श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीपराशरमहर्षिप्रणीते श्रीविष्णुपुराणे

॥ चतुर्थोंऽशः ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

श्री रङ्गरामानुज महादेशिकन्

His Holiness śrīmad āṇḍavan śrīraṅgam

विषयसूची

1 प्रथमोऽध्यायः 3
2 द्वितीयोऽध्यायः 12
3 तृतीयोऽध्यायः 26
4 चतुर्थोऽध्यायः 30
5 पञ्चमोऽध्यायः 40
6 षष्ठोऽध्यायः 43
7 सप्तमोऽध्यायः 51
8 अष्टमोऽध्यायः 55
9 नवमोऽध्यायः 57
10 दशमोऽध्यायः 60
11 एकादशोऽध्यायः 63
12 द्वादशोऽध्यायः 66
13 त्रयोदशोऽध्यायः 70
14 चतुर्दशोऽध्यायः 84
15 पञ्चदशोऽध्यायः 88
16 षोडशोऽध्यायः 93
17 सप्तदशोऽध्यायः 94
18 अष्टादशोऽध्यायः 95
19 एकोनविंशोऽध्यायः 97

20 विंशोऽध्यायः 103
21 एकविंशोऽध्यायः 108
22 द्वाविंशोऽध्यायः 110
23 त्रयोविंशोऽध्यायः 112
24 चतुर्विंशोऽध्यायः 114

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ चतुर्थेंऽशे प्रथमोऽध्यायः ॥

श्रीमैत्रेय उवाच

भगवन्यन्नरैः कार्यं साधुकर्मण्यवस्थितैः।
तन्मह्यं गुरुणाख्यातं नित्यनैमित्तिकात्मकम्॥ 1 ॥ 1

वर्णधर्मास्तथाख्याता
धर्मा ये चाश्रमेषु च।
श्रोतुमिच्छाम्यहं वंशं
राज्ञां तद् ब्रूहि मे गुरो॥ 2 ॥ 2

श्रीपराशर उवाच

मैत्रेय श्रूयतामयमनेकयज्वशूरवीरधीरभूपालालंकृतो ब्रह्मादिर्मानवो वंशः॥ 3 ॥ 3

तदस्य वंशस्यानुपूर्वीमशेषवंशपापप्रणाशनाय मैत्रेयैतां कथां शृणु॥ 4 ॥ 4

तद्यथा सकलजगतामादिरनादिभूतस्स ऋग्यजुस्सामादिमयो भगवान् विष्णुस्तस्य ब्रह्मणो मूर्त्तं रूपं हिरण्यगर्भो ब्रह्माण्डभूतो ब्रह्मा भगवान् प्राग्बभूव॥ 5 ॥ 5

ब्रह्मणश्च दक्षिणाङ्गुष्ठजन्मा दक्षप्रजापतिः दक्षस्याप्यदितिरदितेर्विवस्वान् विवस्वतो मनुः॥ 6 ॥ 6

मनोरिक्ष्वाकुनृगधृष्टशर्यातिनरिष्यन्तप्रांशुनाभागदिष्टकरूषपृषधाख्या दश पुत्रा बभूवुः॥ 7 ॥ 7

इष्टिं च मित्रावरुणयोर्मनुः पुत्रकामश्चकार ॥ 8 ॥ 8

तत्र तावदपह्नुते होतुरपचारादिला नाम कन्या बभूव ॥ 9 ॥ 9

सैवच मित्रावरुणयोः प्रसादात्सुद्युम्नो नाम मनोः पुत्रो मैत्रेय आसीत् ॥ 10 ॥ 10

पुनश्चेश्वरकोपात्स्त्री सती सा तु सोमसूनोर्बुधस्याश्रमसमीपे बभ्राम ॥ 11 ॥ 11

सानुरागश्च तस्यां बुधः पुरूरवसमात्मजमुत्पादयामास ॥ 12 ॥ 12

जातेऽपि तस्मिन्नमिततेजोभिः परमर्षिभिरिष्टिमय ऋङ्मयो
यजुर्मयस्साममयोऽथर्वणमयस्सर्ववेदमयो मनोमयो ज्ञानमयो न
किञ्चिन्मयोऽन्नमयो भगवान् यज्ञपुरुषस्वरूपी सुद्युम्नस्य
पुंस्त्वमभिलषद्भिर्यथावदिष्टस्तत्प्रसादादिला पुनरपि सुद्युम्नोऽभवत् ॥ 13 ॥ 13

तस्याप्युत्कलगयविनतास्त्रयः पुत्रा बभूवुः ॥ 14 ॥ 14

सुद्युम्नस्तु स्त्रीपूर्वकत्वाद्राज्यभागं न लेभे ॥ 15 ॥ 15

तत्पित्रा तु वसिष्ठवचनात्प्रतिष्ठानं नाम नगरं सुद्युम्नाय दत्तं तच्चासौ
पुरूरवसे प्रादात् ॥ 16 ॥ 16

तदन्वयाश्च क्षत्रियास्सर्वे दिक्ष्वभवन्। पृषध्रस्तु मनुपुत्रो
गुरुगोवधाच्छूद्रत्वमगमत् ॥ 17 ॥ 17

मनोः पुत्रः करूषः करूषात्कारूषाः क्षत्रिया महाबलपराक्रमा बभूवुः ॥ 18 ॥ 18

दिष्टपुत्रस्तु नाभागो वैश्यतामगमत्तस्माद्बलन्धनः पुत्रोऽभवत् ॥ 19 ॥ 19

बलन्धनाद्वत्सप्रीतिरुदारकीर्तिः ॥ 20 ॥ 20

वत्सप्रीतेः प्रांशुरभवत् ॥ 21 ॥ 21

प्रजापतिश्च प्रांशोरेकोऽभवत् ॥ 22 ॥ 22

ततश्च खनित्रः ॥ 23 ॥ 23

तस्माच्चाक्षुषः ॥ 24 ॥ 24

चाक्षुषाच्चातिबलपराक्रमो विंशोऽभवत् ॥ 25 ॥ 25

ततो विविंशकः ॥ 26 ॥ 26

तस्माच्च खनिनेत्रः ॥ 27 ॥ 27

ततश्चातिविभूतिः ॥ 28 ॥ 28

अतिविभूतेरतिबलपराक्रमः करन्धमः पुत्रोऽभवत् ॥ 29 ॥ 29

तस्मादप्यविक्षित् ॥ 30 ॥ 30

अविक्षितोऽप्यतिबलपराक्रमः पुत्रो मरुत्तो नामाभवत्; यस्येमावद्यापि श्लोकौ गीयेते ॥ 31 ॥ 31

मरुत्तस्य यथा यज्ञस्तथा कस्याभवद्भुवि।
सर्वं हिरण्मयं यस्य यज्ञवस्त्वतिशोभनम् ॥ 32 ॥ 32

अमाद्यदिन्द्रस्सोमेन दक्षिणाभिर्द्विजातयः।
मरुतः परिवेष्टारस्सदस्याश्च दिवौकसः ॥ 33 ॥ 33

स मरुत्तश्चक्रवर्ती नरिष्यन्तनामानं पुत्रमवाप ॥ 34 ॥ 34

तस्माच्च दमः ॥ 35 ॥ 35

दमस्य पुत्रो राजवर्द्धनो जज्ञे ॥ 36 ॥ 36

राजवर्द्धनात्सुवृद्धिः ॥ 37 ॥ 37

सुवृद्धेः केवलः ॥ 38 ॥ 38

केवलात्सुधृतिर- भूत् ॥ 39 ॥ 39

ततश्च नरः ॥ 40 ॥ 40

तस्माच्चन्द्रः ॥ 41 ॥ 41

ततः केवलोऽभूत् ॥ 42 ॥ 42

केवलाद्बन्धुमान् ॥ 43 ॥ 43

बन्धुमतो वेगवान् ॥ 44 ॥ 44

वेगवतो बुधः ॥ 45 ॥ 45

ततश्च तृणबिन्दुः ॥ 46 ॥ 46

तस्याप्येका कन्या इलविला नाम ॥ 47 ॥ 47

ततश्चालम्बुषा नाम वराप्सरास्तृणबिन्दुं भेजे ॥ 48 ॥ 48

तस्यामप्यस्य विशालो जज्ञे यः पुरीं विशालां निर्ममे ॥ 49 ॥ 49

हेमचन्द्रश्च विशालस्य पुत्रोऽभवत् ॥ 50 ॥ 50

ततश्चन्द्रः ॥ 51 ॥ 51

तत्तनयो धूम्राक्षः ॥ 52 ॥ 52

तस्यापि सृञ्जयोऽभूत् ॥ 53 ॥ 53

सृञ्जयात्सहदेवः ॥ 54 ॥ 54

ततश्च कृशाश्वो नाम पुत्रोऽभवत् ॥ 55 ॥ 55

सोमदत्तः कृशाश्वाज्जज्ञे योऽश्वमेधानां शतमाजहार ॥ 56 ॥ 56

तत्पुत्रो जनमेजयः ॥ 57 ॥ 57

जनमेजयात्सुमतिः ॥ 58 ॥ 58

एते वैशालिका भूभृतः ॥ 59 ॥ 59

श्लोकोऽप्यत्र गीयते ॥ 60 ॥ 60

तृणबिन्दोः प्रसादेन सर्वे वैशालिका नृपाः। दीर्घायुषो महात्मानो वीर्यवन्तोऽतिधार्मिकाः ॥ 61 ॥ 61

शर्यातेः कन्या सुकन्या नामाभवत्, यामुपयेमे च्यवनः ॥ 62 ॥ 62

आनर्त्तनामा परमधार्मिकश्शर्यातिपुत्रोऽभवत् ॥ 63 ॥ 63

आनर्त्तस्यापि रेवतनामा पुत्रो यज्ञे योऽसावानर्त्तविषयं बुभुजे पुरीं च कुशस्थलीमध्युवास ॥ 64 ॥ 64

रेवतस्यापि रैवतः पुत्रः ककुद्मिनामा धर्मात्मा भ्रातृशतस्य ज्येष्ठोऽभवत् ॥ 65 ॥ 65

तस्य रेवती नाम कन्याभवत् ॥ 66 ॥ 66

स तामादाय कस्येयमर्हतीति भगवन्तमब्जयोनिं प्रष्टुं ब्रह्मलोकं जगाम ॥ 67 ॥ 67

तावच्च ब्रह्मणोऽन्तिके हाहाहूहूसंज्ञाभ्यां गन्धर्वाभ्यामतितानं नाम दिव्यं गान्धर्वमगीयत ॥ 68 ॥ 68

तच्च त्रिमार्गपरिवृत्तैरनेकयुगपरिवृत्तिं तिष्ठन्नपि रैवतश्शृण्वन्मुहूर्त्तमिव मेने ॥ 69 ॥ 69

गीतावसाने च भगवन्तमब्जयोनिं प्रणम्य रैवतः कन्यायोग्यं वरमपृच्छत् ॥ 70 ॥ 70

ततश्चासौ भगवानकथयत कथय योऽभिमतस्ते वर इति ॥ 71 ॥ 71

पुनश्च प्रणम्य भगवते तस्मै यथाभिमतानात्मनस्स्स वरान् कथयामास। क एषां भगवतोऽभिमत इति यस्मै कन्यामिमां प्रयच्छामीति ॥ 72 ॥ 72

ततः किञ्चिदवनतशिरास्स्सस्मितं भगवानब्जयोनिराह ॥ 73 ॥ 73

य एते भवतोऽभिमता नैतेषां साम्प्रतं
पुत्रपौत्रापत्यापत्यसन्ततिरस्त्यवनीतले ॥ 74 ॥ 74

बहूनि तवात्रैव गान्धर्वं शृण्वतश्चतुर्युगान्यतीतानि ॥ 75 ॥ 75

साम्प्रत महीतलेऽष्टाविंशतितममनोश्चतुर्युगमतीतप्रायं वर्तते ॥ 76 ॥ 76

आसन्नो हि कलिः ॥ 77 ॥ 77

अन्यस्मै कन्यारत्नमिदं भवतैकाकिनाभिमताय देयम् ॥ 78 ॥ 78

भवतोऽपि पुत्रमित्रकलत्रमन्त्रिभृत्यबन्धुबलकोशादयस्समस्ताः
कालेनैतेनात्यन्तमतीताः ॥ 79 ॥ 79

ततः पुनरप्युत्पन्नसाध्वसो राजा भगवन्तं प्रणम्य पप्रच्छ ॥ 80 ॥ 80

भगवन्नेवमवस्थिते मयेयं कस्मै देयेति ॥ 81 ॥ 81

ततस्स भगवान् किञ्चिदवनम्रकन्धरः कृताञ्जलिर्भूत्वा
सर्वलोकगुरुरभ्भोजयोनिराह ॥ 82 ॥ 82

श्रीब्रह्मोवाच

न ह्यादिमध्यान्तमजस्य यस्य
विद्मो वयं सर्वमयस्य धातुः।
न च स्वरूपं न परं स्वभावं
न चैव सारं परमेश्वरस्य ॥ 83 ॥ 83

कलामुहूर्त्तादिमयश्च कालो
न यद्विभूतेः परिणामहेतुः।
अजन्मनाशस्य सदैकमूर्त्ते -
रनामरूपस्य सनातनस्य॥ **84**॥ 84

यस्य प्रसादादहमच्युतस्य
भूतः प्रजासृष्टिकरोऽन्तकारी।
क्रोधाच्च रुद्रः स्थितिहेतुभूतो
यस्माच्च मध्ये पुरुषः परस्मात्॥ **85**॥ 85

मद्रूपमास्थाय सृजत्यजो यः
स्थितौ च योऽसौ पुरुषस्वरूपी।
रुद्रस्वरूपेण च योऽत्ति विश्वं
धत्ते तथानन्तवपुस्समस्तम्॥ **86**॥ 86

पाकाय योऽग्नित्वमुपैति लोकान् -
बिभर्त्ति पृथ्वीवपुरव्ययात्मा।
शक्रादिरूपी परिपाति विश्व -
मर्केन्दुरूपश्च तमो हिनस्ति॥ **87**॥ 87

करोति चेष्टाश्श्वसनस्वरूपी
लोकस्य तृप्तिं च जलान्नरूपी।
ददाति विश्वस्थितिसंस्थितस्तु
सर्वावकाशं च नभस्स्वरूपी॥ **88**॥ 88

यस्सृज्यते सर्गकृदात्मनैव
यः पाल्यते पालयिता च देवः।
विश्वात्मकस्संह्रियतेऽन्तकारी
पृथक् त्रयस्यास्य च योऽव्ययात्मा॥ **89**॥ 89

यस्मिञ्जगद्यो जगदेतदाद्यो
यश्चाश्रितोऽस्मिञ्जगति स्वयम्भूः।
ससर्वभूतप्रभवो धरित्र्यां
स्वांशेन विष्णुर्नृपतेऽवतीर्णः॥ **90**॥ 90

कुशस्थली या तव भूप रम्या
पुरी पुराभूदमरावतीव।
सा द्वारका सम्प्रति तत्र चास्ते
स केशवांशो बलदेवनामा॥ **91**॥ 91

तस्मै त्वमेनां तनयां नरेन्द्र
प्रयच्छ मायामनुजाय जायाम्।
श्लाघ्यो वरोऽसौ तनया तवेयं
स्त्रीरत्नभूता सदृशो हि योगः॥ **92**॥ 92

श्रीपराशर उवाच

इतीरितोऽसौ कमलोद्भवेन
भुवं समासाद्य पतिः प्रजानाम्।
ददर्श ह्रस्वान् पुरुषान् विरूपा -
नल्पौजसस्स्वल्पविवेकवीर्यान्॥ **93**॥ 93

कुशस्थलीं तां च पुरीमुपेत्य
दृष्ट्वान्यरूपां प्रददौ स कन्याम्।
सीरायुधाय स्फटिकाचलाभ -
वक्षःस्थलायातुलधीर्नरेन्द्रः॥ **94**॥ 94

उच्चप्रमाणामिति तामवेक्ष्य
स्वलाङ्गलाग्रेण च तालकेतुः।

विनम्रयामास ततश्च सापि
बभूव सद्यो वनिता यथान्या ॥ 95 ॥ 95

तां रेवतीं रैवतभूपकन्यां
सीरायुधोऽसौ विधिनोपयेमे।
दत्त्वाथ कन्यां स नृपो जगाम
हिमालयं वै तपसे धृतात्मा ॥ 96 ॥ 96

॥ इति श्रीविष्णुपुराणे चतुर्थेंऽशे प्रथमोऽध्यायः ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ चतुर्थेंऽशे द्वितीयोऽध्यायः ॥

श्रीपराशर उवाच

यावच्च ब्रह्मलोकात्स ककुद्मी रैवतो नाभ्येति तावत्पुण्यजनसंज्ञा राक्षसास्तामस्य पुरीं कुशस्थलीं निजघ्नुः ॥ 1 ॥ 97

तच्चास्य भ्रातृशतं पुण्यजनत्रासाद्दिशो भेजे ॥ 2 ॥ 98

तदन्वयाश्च क्षत्रियास्सर्वदिक्ष्वभवन् ॥ 3 ॥ 99

धृष्टस्यापि धाष्टकं क्षत्रमभवत् ॥ 4 ॥ 100

नाभागस्यात्मजो नाभागसंज्ञोऽभवत् ॥ 5 ॥ 101

तस्याप्यम्बरीषः ॥ 6 ॥ 102

अम्बरीषस्यापि विरूपोऽभवत् ॥ 7 ॥ 103

विरूपात्पृषदश्वो जज्ञे ॥ 8 ॥ 104

ततश्च रथीतरः ॥ 9 ॥ 105

अत्रायं श्लोकः
एते क्षत्रप्रसूता वै पुनश्चाङ्गिरसाः स्मृताः।
रथीतराणां प्रवराः क्षत्रोपेता द्विजातयः ॥ 10 ॥ 106

क्षुतवतश्च मनोरिक्ष्वाकुः पुत्रो जज्ञे घ्राणतः ॥ 11 ॥ 107

तस्य पुत्रशतप्रधाना विकुक्षिनिमिदण्डाख्यास्त्रयः पुत्रा बभूवुः ॥ 12 ॥ 108

शकुनिप्रमुखाः पञ्चाशत्पुत्रा उत्तरापथरक्षितारो बभूवुः ॥ 13 ॥ 109

चत्वारिंशदष्टौ च दक्षिणापथभूपालाः ॥ 14 ॥ 110

स चेक्ष्वाकुरष्टकायाश्श्राद्धमुत्पाद्य श्राद्धार्ह मांसमानयेति विकुक्षिमाज्ञापयामास ॥ 15 ॥ 111

स तथेति गृहीताज्ञो विधृतशरासनो वनमभ्येत्यानेकशो मृगान् हत्वा श्रान्तोऽतिक्षुत्परीतो विकुक्षिरेकं शशमभक्षयत्। शेषं च मांसमानीय पित्रे निवेदयामास ॥ 16 ॥ 112

इक्ष्वाकुकुलाचार्यो वसिष्ठस्तत्प्रोक्षणाय चोदितः प्राह। अलमनेनामेध्येनामिषेण दुरात्मना तव पुत्रेणैतन्मांसमुपहतं यतोऽनेन शशो भक्षितः ॥ 17 ॥ 113

ततश्चासौ विकुक्षिर्गुरुणैवमुक्तश्शशादसंज्ञामवाप पित्रा च परित्यक्तः ॥ 18 ॥ 114

पितर्युपरते चासावखिलामेतां पृथ्वीं धर्मतश्शशास ॥ 19 ॥ 115

शशादस्य तस्य पुरञ्जयो नाम पुत्रोऽभवत् ॥ 20 ॥ 116

तस्येदं चान्यत् ॥ 21 ॥ 117

पुरा हि त्रेतायां देवासुरयुद्धमतिभीषणमभवत् ॥ 22 ॥ 118

तत्र चातिबलिभिरसुरैरमराः पराजितास्ते भगवन्तं विष्णुमाराधयाञ्चक्रुः ॥ 23 ॥ 119

प्रसन्नश्च देवानामनादिनिधनोऽखिलजगत्परायणो नारायणः प्राह ॥ 24 ॥ 120

ज्ञातमेतन्मया युष्माभिर्यदभिलषितं तदर्थमिदं श्रूयताम् ॥ 25 ॥ 121

पुरञ्जयो नाम राजर्षेश्शशादस्य तनयः क्षत्रियवरो यस्तस्य शरीरेऽहमंशेन स्वयमेवावतीर्य तानशेषानसुरान्निहनिष्यामि तद्भवद्भिः पुरञ्जयोऽसुरवधार्थमुद्योगं कार्यतामिति ॥ 26 ॥ 122

एतच्च श्रुत्वा प्रणम्य भगवन्तं विष्णुममराः पुरञ्जयसकाशमाजग्मुरूचुश्चैनम् ॥ 27 ॥ 123

भो भो क्षत्रियवर्यास्माभिरभ्यर्थितेन भवतास्माकमरातिवधोद्यतानां कर्तव्यं साहाय्यमिच्छामस्तद्भवतास्माकमभ्यागतानां प्रणयभङ्गो न कार्य इत्युक्तः पुरञ्जयः प्राह ॥ 28 ॥ 124

त्रैलोक्यनाथो योऽयं युष्माकमिन्द्रः शतक्रतुरस्य य स्कन्धाधिरूढो युष्माकमरातिभिस्सह योत्स्ये तदहं भवतां सहायः स्याम ॥ 29 ॥ 125

इत्याकर्ण्य समस्तदेवैरिन्द्रेण च बाढमित्येवं समन्वीप्सितम् ॥ 30 ॥ 126

ततश्च शतक्रतोर्वृषरूपधारिणः ककुदि स्थितोऽतिरोषसमन्वितो भगवतश्चराचरगुरोरच्युतस्य तेजसाप्यायितो देवासुरसङ्ग्रामे समस्तानेवासुरान्निजघान ॥ 31 ॥ 127

यतश्च वृषभककुदि स्थितेन राज्ञा दैतेयबलं निषूदितमतश्चासौ ककुत्स्थसंज्ञामवाप ॥ 32 ॥ 128

ककुत्स्थस्याप्यनेनाः पुत्रोऽभवत् ॥ 33 ॥ 129

पृथुरनेनसः ॥ 34 ॥ 130

पृथोर्विष्टराश्वः ॥ 35 ॥ 131

तस्यापि चान्द्रो युवनाश्वः ॥ 36 ॥ 132

चान्द्रस्य तस्य युवनाश्वस्य शावस्तः यः पुरीं शावस्तीं निवेशयामास ॥ 37 ॥ 133

शावस्तस्य बृहदश्वः ॥ 38 ॥ 134

तस्यापि कुवलयाश्वः ॥ 39 ॥ 135

योऽसावुदकस्य महर्षेरपकारिणं धुन्धुनामानमसुरं वैष्णवेन तेजसाप्यायितः पुत्रसहस्रैरेकविंशद्भिः परिवृतो जघान धुन्धुमारसंज्ञामवाप ॥ 40 ॥ 136

तस्य च तनयास्समस्ता एव धुन्धुमुखनिःश्वासाग्निना विप्लुष्टा विनेशुः ॥ 41 ॥ 137

दृढाश्वचन्द्राश्वकपिलाश्वाश्च त्रयः केवलं शेषिताः ॥ 42 ॥ 138

दृढाश्वाद्धर्यश्वः ॥ 43 ॥ 139

तस्माच्च निकुम्भः ॥ 44 ॥ 140

निकुम्भस्यामिताश्वः ॥ 45 ॥ 141

ततश्च कृशाश्वः ॥ 46 ॥ 142

तस्माच्च प्रसेनजित् ॥ 47 ॥ 143

प्रसेनजितो युवनाश्वोऽभवत् ॥ 48 ॥ 144

तस्य चापुत्रस्यातिनिर्वेदान्मुनीनामाश्रममण्डले निवसतो दयालुभिर्मुनिभिरपत्योत्पादनायेष्टिः कृता ॥ 49 ॥ 145

तस्यां च मध्यरात्रौ निवृत्तायां मन्त्रपूतजलपूर्णं कलशं वेदिमध्ये निवेश्य ते मुनयः सुषुपुः ॥ 50 ॥ 146

सुप्तेषु तेषु अतीव तृड्वरीतस्स्य भूपालस्तमाश्रमं विवेश ॥ 51 ॥ 147

सुप्तांश्च तानृषीन्नैवोत्थापयामास ॥ 52 ॥ 148

तच्च कलशमपरिमेयमाहात्म्यमन्त्रपूतं पपौ ॥ 53 ॥ 149

प्रबुद्धाश्च ऋषयः पप्रच्छुः केनैतन्मन्त्रपूतं वारि पीतम्॥ 54॥ 150

अत्र हि राज्ञो युवनाश्वस्य पत्नी महाबलपराक्रमं पुत्रं जनयिष्यति। इत्याकर्ण्य स राजा अजानता मया पीतमित्याह॥ 55॥ 151

गर्भश्च युवनाश्वस्योदरे अभवत् क्रमेण च ववृधे॥ 56॥ 152

प्राप्तसमयश्च दक्षिणं कुक्षिमवनिपतेर्निर्भिद्य निश्चक्राम॥ 57॥ 153

न चासौ राजा ममार॥ 58॥ 154

जातो नामैष कं धास्यतीति ते मुनयः प्रोचुः॥ 59॥ 155

अथागत्य देवराजोऽब्रवीत् मामयं धास्यतीति॥ 60॥ 156

ततो मान्धातृनामा सोऽभवत्। वक्त्रे चास्य प्रदेशिनी देवेन्द्रेण न्यस्ता तां पपौ॥ 61॥ 157

तां चामृतस्राविणीमास्वाद्याह्नैव स व्यवर्द्धत॥ 62॥ 158

ततस्तु मान्धाता चक्रवर्ती सप्तद्वीपां महीं बुभुजे॥ 63॥ 159

तत्रायं श्लोकः॥ 64॥ 160

यावत्सूर्य उदेत्यस्तं यावच्च प्रतितिष्ठति। सर्वं तद्यौवनाश्वस्य मान्धातुः क्षेत्रमुच्यते॥ 65॥ 161

मान्धाता शतबिन्दोर्दुहितरं बिन्दुमतीमुपयेमे॥ 66॥ 162

पुरुकुत्समम्बरीषं मुचुकुन्दं च तस्यां पुत्रत्रयमुत्पादयामास॥ 67॥ 163

पञ्चाशद्दुहितरस्तस्यामेव तस्य नृपतेर्बभूवुः॥ 68॥ 164

तस्मिन्नन्तरे बह्वृचश्च सौभरिर्नाम महर्षिरन्तर्जले द्वादशाब्दं
कालमुवास ॥ 69 ॥ 165

तत्र चान्तर्जले सम्मदो नामातिबहुप्रजोऽतिमात्रप्रमाणो
मीनाधिपतिरासीत् ॥ 70 ॥ 166

तस्य च पुत्रपौत्रदौहित्राः पृष्ठतोऽग्रतः पार्श्वयोः पक्षपुच्छशिरसां चोपरि
भ्रमन्तस्तेनैव सदाहर्निशमतिनिर्वृता रेमिरे ॥ 71 ॥ 167

चापत्यस्पर्शोपचीयमानप्रहर्षप्रकर्षो बहुप्रकारं स तस्य ऋषेः
पश्यतस्तैरात्मजपुत्रपौत्रदौहित्रादिभिः सहानुदिनं रेमे ॥ 72 ॥ 168

सुतरां अथान्तर्जलावस्थितस्सौभरिरेकाग्रतस्समाधिमपहायानुदिनं तस्य
मत्स्यस्यात्मजपुत्रपौत्रदौहित्रादिभिस्सहातिरमणीयताम -
वेक्ष्याचिन्तयत् ॥ 73 ॥ 169

अहो धन्योऽयमीदृशमनभिमतं
योन्यन्तरमवाप्यैभिरात्मजपुत्रपौत्रदौहित्रादिभिस्सह रममाणोऽतीवास्माकं
स्पृहामुत्पादयति ॥ 74 ॥ 170

वयमप्येवं पुत्रादिभिस्सह ललितं रंस्यामहे इत्येवमभिकाङ्क्षन् स
तस्मादन्तर्जलान्निष्क्रम्य सन्तानाय निवेष्टुकामः कन्यार्थं मान्धातारं
राजानमगच्छत् ॥ 75 ॥ 171

आगमनश्रवणसमनन्तरं चोत्थाय तेन राज्ञा सम्यगर्घ्यादिना सम्पूजितः
कृतासनपरिग्रहः सौभरिरुवाच राजानम् ॥ 76 ॥ 172

सौभरिरुवाच

निवेष्टुकामोऽस्मि नरेन्द्र कन्यां
प्रयच्छ मे मा प्रणयं विभाङ्क्षीः।

न ह्यर्थिनः कार्यवशादुपेताः
कुकुत्स्थवंशे विमुखाः प्रयान्ति ॥ 77 ॥ 173

अन्येऽपि सन्त्येव नृपाः पृथिव्यां
मान्धातरेषां तनयाः प्रसूताः।
किं त्वर्थिनामर्थितदानदीक्षा -
कृतव्रतं श्लाघ्यमिदं कुलं ते ॥ 78 ॥ 174

शतार्धसंख्यास्तव सन्ति कन्या -
स्तासां ममैकां नृपते प्रयच्छ।
यत्प्रार्थनाभङ्गभयाद्बिभेमि
तस्मादहं राजवरातिदुःखात् ॥ 79 ॥ 175

श्रीपराशर उवाच

इति ऋषिवचनमाकर्ण्य स राजा जराजर्जरित देहमृषिमालोक्य प्रत्याख्यानकातरस्तस्माच्च शापभीतो बिभ्यत्किञ्चिदधोमुखश्चिरं दध्यौ च ॥ 80 ॥ 176

सौभरिरुवाच

नरेन्द्र कस्मात्समुपैषि चिन्ता -
मसह्यमुक्तं न मयात्र किञ्चित्।
यावश्यदेया तनया तयैव
कृतार्थता नो यदि किं न लब्धा ॥ 81 ॥ 177

श्रीपराशर उवाच

अथ तस्य भगवतश्शापभीतस्सप्रश्रयस्तमुवाचासौ राजा ॥ 82 ॥ 178

राजोवाच

भगवन् अस्मत्कुलस्थितिरियं य एव कन्याभिरुचितोऽभिजनवान्वरस्तस्मै कन्यां प्रदीयते भगवद्याच्ञा चास्मन्मनोरथानामप्यतिगोचरवर्त्तिनी कथमप्येषा सञ्जाता तदेवमुपस्थिते न विद्मः किं कुर्म इत्येतन्मया चिन्त्यत इत्यभिहिते च तेन भूभुजा मुनिरचिन्तयत्॥ **83**॥ 179

अयमन्योऽस्मत्प्रत्याख्यानोपायो वृद्धोऽयमनभिमतः स्त्रीणां किमुत कन्यकानामित्यमुना सञ्चिन्त्यैतदभिहितमेवमस्तु तथा करिष्यामीति सञ्चिन्त्य मान्धातारमुवाच॥ **84**॥ 180

यद्येवं तदादिश्यतामस्माकं प्रवेशाय कन्यान्तः पुरवर्षवरो यदि कन्यैव काचिन्मामभिलषति तदाहं दारसङ्ग्रहं करिष्यामि अन्यथा चेत्तदलमस्माकमेतेनातीतकालारभ्भणेनेत्युक्त्वा विरराम॥ **85**॥ 181

तेन ततश्च मान्धात्रा मुनिशापशङ्कितेन कन्यान्तःपुरवर्षवरस्समाज्ञप्तः॥ **86**॥ 182

सह कन्यान्तः पुरं प्रविशन्नेव भगवानखिलसिद्धगन्धर्वेभ्योऽतिशयेन कमनीयं रूपमकरोत्॥ **87**॥ 183

प्रवेश्य च तमृषिमन्तःपुरे वर्षवरस्ताः कन्याः प्राह॥ **88**॥ 184

भवतीनां जनयिता महाराजसमाज्ञापयति॥ **89**॥ 185

अयमस्मान् ब्रह्मर्षिः कन्यार्थं समभ्यागतः॥ **90**॥ 186

मया चास्य प्रतिज्ञातं यद्यस्मत्कन्या या काचिद्भगवन्तं वरयति तत्कन्यायाश्छन्दे नाहं परिपन्थानं करिष्यामीत्याकर्ण्य सर्वा एव ताः कन्याः सानुरागाः सप्रमदाः करेणव इवेभयूथपतिं तमृषिमहमहमिकया वरयाम्बभूवुरूचुश्च॥ **91**॥ 187

अलं भगिन्योऽहमिमं वृणोमि
वृणोम्यहं नैष तवानुरूपः।

ममैष भर्त्ता विधिनैव सृष्ट -
स्सृष्टाहमस्योपशमं प्रयाहि ॥ 92 ॥ 188

वृतो मयायं प्रथमं मयायं
गृहं विशन्नेव विहन्यसे किम्।
मया मयेति क्षितिपात्मजानां
तदर्थमत्यर्थकलिर्बभूव ॥ 93 ॥ 189

यदा मुनिस्ताभिरतीवहार्दाद् -
वृतस्स कन्याभिरनिन्द्यकीर्तिः।
तदा स कन्याधिकृतो नृपाय
यथावदाचष्ट विनम्रमूर्त्तिः ॥ 94 ॥ 190

श्रीपराशर उवाच

तदवगमात्किङ्किमेतत्कथमेतत्किं किं करोमि किं
मयाभिहितमित्याकुलमतिरनिच्छन्नपि कथमपि राजानुमेने ॥ 95 ॥ 191

कृतानुरूपविवाहश्च महर्षिस्सकला एव ताः कन्यास्स्वमाश्रममनयत् ॥ 96 ॥ 192

तत्र चाशेषशिल्पकल्पप्रणेतारं धातारमिवान्यं विश्वकर्माणमाहूय
सकलकन्यानामेकैकस्याः प्रोत्फुल्लपङ्कजाः
कूजत्कलहंसकारण्डवादिविहङ्गमाभिरामजलाशयास्सोपधानाः
सावकाशास्साधुशय्यापरिच्छदाः प्रासादाः क्रियन्तामित्यादिदेश ॥ 97 ॥ 193

तच्च तथैवानुष्ठितमशेषशिल्पविशेषाचार्यस्त्वष्टा दर्शितवान् ॥ 98 ॥ 194

ततः परमर्षिणा सौभरिणाज्ञप्तस्तेषु गृहेष्वनिवार्यानन्दनामा
महानिधिरासाञ्चक्रे ॥ 99 ॥ 195

ततोऽनवरतेन
भक्ष्यभोज्यलेह्याद्युपभोगैरागतानुगतभृत्यादीनहर्निशमशेषगृहेषु ताः
क्षितीशदुहितरो भोजयामासुः ॥ **100** ॥ 196

एकदा तु दुहितृस्नेहाकृष्टहृदयस्स महीपतिरतिदुःखितास्ता उत सुखिता वा
इति विचिन्त्य तस्य महर्षेराश्रमसमीपमुपेत्य स्फुरदंशुमालाललामां
स्फटिकमयप्रासादमालामतिरम्योपवनजलाशयां ददर्श ॥ **101** ॥ 197

प्रविश्य चैकं प्रासादमात्मजां परिष्वज्य कृतासनपरिग्रहः
प्रवृद्धस्नेहनयनाम्बुगर्भनयनोऽब्रवीत् ॥ **102** ॥ 198

अप्यत्र वत्से भवत्याः सुखमुत किञ्चिदसुखमपि ते महर्षिस्स्नेहवानुत न,
स्मर्यतेऽस्मद्गृहवास इत्युक्ता तं तनया पितरमाह ॥ **103** ॥ 199

तातातिरमणीयः प्रासादोऽत्रातिमनोज्ञमुपवनमेते कलवाक्यविहङ्गमाभिरुताः
प्रोत्फुल्लपद्माकरजलाशया च
मनोऽनुकूलभक्ष्यभोज्यानुलेपनवस्त्रभूषणादिभोगो मृदूनि शयनासनानि
सर्वसम्पत्समेतं मे गार्हस्थ्यम् ॥ **104** ॥ 200

तथापि केन वा जन्मभूमिर्न स्मर्यते ॥ **105** ॥ 201

त्वत्प्रसादादिदमशेषमतिशोभनम् ॥ **106** ॥ 202

किं त्वेकं ममैतद्दुःखकारणं यदस्मद्गृहान्महर्षिरयम्मद्भर्त्ता न निष्क्रामति
ममैव केवलमतिप्रीत्या समीपपरिवर्ती नान्यासामस्मद्भगिनीनाम् ॥ **107** ॥ 203

एवं च मम सोदर्योऽतिदुःखिता इत्येवमतिदुःखकारणमित्युक्तस्तया द्वितीयं
प्रासादमुपेत्य स्वतनयां परिष्वज्योपविष्टस्तथैव पृष्टवान् ॥ **108** ॥ 204

तयापि सर्वमेतत्तत्प्रासादाद्युपभोगसुखं भृशमाख्यातं ममैव केवलमतिप्रीत्या
पार्श्वपरिवर्त्ती नान्यासामस्मद्भगिनीनामित्येवमादि श्रुत्वा समस्तप्रासादेषु
राजा प्रविवेश तनयां तनयां तथैवापृच्छत्॥ **109**॥ 205

सर्वाभिश्च ताभिस्तथैवाभिहितः परितोषविस्मयनिर्भरविवशहृदयो भगवन्तं
सौभरिमेकान्तावस्थितमुपेत्य कृतपूजोऽब्रवीत्॥ **110**॥ 206

दृष्टस्ते भगवन् सुमहानेष सिद्धिप्रभावो नैवंविधमन्यस्य
कस्यचिदस्माभिर्विभूतिभिर्विलसितमुपलक्षितं यदेतद्भगवतस्तपसः
फलमित्यभिपूज्य तमृषिं तत्रैव तेन ऋषिवर्येण सह
किञ्चित्कालमभिमतोपभोगान् बुभुजे स्वपुरं च जगाम॥ **111**॥ 207

कालेन गच्छता तस्य तासु राजतनयासु पुत्रशतं सार्धमभवत्॥ **112**॥ 208

अनुदिनानुरूढस्नेहप्रसरश्च स तत्रातीव ममताकृष्टहृदयोऽभवत्॥ **113**॥ 209

अप्येतेऽस्मत्पुत्राः कलभाषिणः पद्भ्यां गच्छेयुः अप्येते यौवनिनो भवेयुः,
अपि कृतदारानेतान् पश्येयमप्येषां पुत्रा भवेयुः
अप्येतत्पुत्रान्पुत्रसमन्वितान्पश्यामीत्यादिमनोरथाननुदिनं
कालसम्पत्तिप्रवृद्धानुपेक्ष्यैतच्चिन्तयामास॥ **114**॥ 210

अहो मे मोहस्यातिविस्तारः॥ **115**॥ 211

मनोरथानां न समाप्तिरस्ति
वर्षायुतेनापि तथाब्दलक्षैः।
पूर्णेषु पूर्णेषु मनोरथाना -
मुत्पत्तयस्सन्ति पुनर्नवानाम्॥ **116**॥ 212

पद्भ्यां गता यौवनिनश्च जाता
दारैश्च संयोगमिताः प्रसूताः।

दृष्टाः सुतास्तत्तनयप्रसूतिं
द्रष्टुं पुनर्वाञ्छति मेऽन्तरात्मा ॥ **117** ॥ 213

द्रक्ष्यामि तेषामिति चेत्प्रसूतिं
मनोरथो मे भविता ततोऽन्यः।
पूर्णेऽपि तत्राप्यपरस्य जन्म
निवार्यते केन मनोरथस्य ॥ **118** ॥ 214

आमृत्युतो नैव मनोरथाना -
मन्तोऽस्ति विज्ञातमिदं मयाद्य।
मनोरथासक्तिपरस्य चित्तं
न जायते वै परमार्थसङ्गि ॥ **119** ॥ 215

स मे समाधिर्जलवासमित्र -
मत्स्यस्य सङ्गात्सहसैव नष्टः।
परिग्रहस्सङ्गकृतो मयायं
परिग्रहोत्था च ममातिलिप्सा ॥ **120** ॥ 216

दुःखं यदैवैकशरीरजन्म
शतार्द्धसंख्याकमिदं प्रसूतम्।
परिग्रहेण क्षितिपात्मजानां
सुतैरनेकैर्बहुलीकृतं तत् ॥ **121** ॥ 217

सुतात्मजैस्तत्तनयैश्च भूयो
भूयश्च तेषां च परिग्रहेण।
विस्तारमेष्यत्यतिदुःखहेतुः
परिग्रहो वै ममताभिधानः ॥ **122** ॥ 218

चीर्णं तपो यत्तु जलाश्रयेण
तस्यर्द्धिरेषा तपसोऽन्तरायः।

मत्स्यस्य सङ्गादभवच्च यो मे
सुतादिरागो मुषितोऽस्मि तेन ॥ **123** ॥ 219

निस्सङ्गता मुक्तिपदं यतीनां
सङ्गादशेषाः प्रभवन्ति दोषाः।
आरूढयोगो विनिपात्यतेऽध -
स्सङ्गेन योगी किमुताल्पबुद्धिः ॥ **124** ॥ 220

अहं चरिष्यामि तदात्मनोऽर्थे
परिग्रहग्राहगृहीतबुद्धिः।
यदा हि भूयः परिहीनदोषो
जनस्य दुःखैर्भविता न दुःखी ॥ **125** ॥ 221

सर्वस्य धातारमचिन्त्यरूपमणोरणीयांसमतिप्रमाणम्। सितासितं
चेश्वरमीश्वराणामाराधयिष्ये तपसैव विष्णुम् ॥ **126** ॥ 222

तस्मिन्नशेषौजसि सर्वरूपि -
ण्यव्यक्तविस्पष्टतनावनन्ते।
ममाचलं चित्तमपेतदोषं
सदास्तु विष्णावभवाय भूयः ॥ **127** ॥ 223

समस्तभूतादमलादनन्ता -
त्सर्वेश्वरादन्यदनादिमध्यात्।
यस्मान्न किञ्चित्तमहं गुरूणां
परं गुरुं संश्रयमेमि विष्णुम् ॥ **128** ॥ 224

श्रीपराशर उवाच

इत्यात्मानमात्मनैवाभिधायासौ सौभरिरपहाय
पुत्रगृहासनपरिच्छदादिकमशेषमर्थजातं सकलभार्यासमन्वितो वनं
प्रविवेश ॥ **129** ॥ 225

तत्राप्यनुदिनं वैखानसनिष्पाद्यमशेषक्रियाकलापं निष्पाद्य क्षपितसकलपापः
परिपक्वमनोवृत्तिरात्मन्यग्नीन्समारोप्य भिक्षुरभवत् ॥ **130** ॥ 226

भगवत्यासज्याखिलं कर्मकलापं
हित्वानन्तमजमनादिनिधनमविकारमरणादिधर्ममवाप परमनन्तं
परवतामच्युतं पदम् ॥ **131** ॥ 227

इत्येतन्मान्धातृदुहितृसम्बन्धादाख्यातम् ॥ **132** ॥ 228

यश्चैतत्सौभरिचरितमनुस्मरति पठति पाठयति शृणोति श्रावयति
धरत्यवधारयति लिखति लेखयति शिक्षयत्यध्यापयत्युपदिशति वा तस्य
षड् जन्मानि दुस्सन्ततिरसद्धर्मो वाङ्मनसयोरसन्मार्गाचरणमशेषहेतुषु
वा ममत्वं न भवति ॥ **133** ॥ 229

॥ इति श्रीविष्णुपुराणे चतुर्थेंऽशे द्वितीयोऽध्यायः ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ चतुर्थेंऽशे तृतीयोऽध्यायः ॥

अतश्च मान्धातुः पुत्रसन्ततिरभिधीयते ॥ 1 ॥ 230

अम्बरीषस्य मान्धातृतनयस्य युवनाश्वः पुत्रोऽभूत् ॥ 2 ॥ 231

तस्माद्धारीतः, यतोऽङ्गिरसो हारीताः ॥ 3 ॥ 232

रसातले मौनेया नाम गन्धर्वा बभूवुष्षड्कोटिसंख्यातास्तैरशेषाणि - नागकुलान्यपहृतप्रधानरत्नाधिपत्यान्यक्रियन्त ॥ 4 ॥ 233

तैश्च गन्धर्ववीर्यावधूतैरुरगेश्वरैः स्तूयमानो भगवानशेषदेवेशः स्तवच्छ्रवणोन्मीलितोन्निद्रपुण्डरीकनयनो जलशयनो निद्रावसानात् प्रबुद्धः प्रणिपत्याभिहितः। भगवन्नस्माकमेतेभ्यो गन्धर्वेभ्यो भयमुत्पन्नं कथमुपशममेष्यतीति ॥ 5 ॥ 234

आह च भगवाननादिनिधनपुरुषोत्तमो योऽसौ यौवनाश्वस्य मान्धातुः पुरुकुत्सनामा पुत्रस्तमहमनुप्रविश्य तानशेषान् दुष्टगन्धर्वानुपशमं नयिष्यामीति ॥ 6 ॥ 235

तदाकर्ण्य भगवते जलशायिने कृतप्रणामाः पुनर्नागलोकमागताः पन्नगाधिपतयो नर्मदां च पुरुकुत्सानयनाय चोदयामासुः ॥ 7 ॥ 236

सा चैनं नीतवती ॥ 8 ॥ 237

रसातलं रसातलगतश्चासौ भगवत्तेजसाप्यायितात्मवीर्यस्सकलगन्धर्वान्निजघान ॥ 9 ॥ 238

स्वपुरमाजगाम ॥ 10 ॥ 239

पुनश्च सकलपन्नगाधिपतयश्च नर्मदायै वरं ददुः। यस्तेऽनुस्मरणसमवेतं नामग्रहणं करिष्यति न तस्य सर्पविषभयं भविष्यतीति ॥ 11 ॥ 240

अत्र च श्लोकः ॥ 12 ॥ 241

नर्मदायै नमः प्रातर्नर्मदायै नमो निशि।
नमोऽस्तु नर्मदे तुभ्यं त्राहि मां विषसर्पतः ॥ 13 ॥ 242

इत्युच्चार्याहर्निशमन्धकारप्रवेशे वा सर्पैर्न दश्यते न चापि कृतानुस्मरणभुजो विषमपि भुक्तमुपघाताय भवति ॥ 14 ॥ 243

पुरुकुत्साय सन्ततिविच्छेदो न भविष्यतीत्युरगपतयो वरं ददुः ॥ 15 ॥ 244

पुरुकुत्सो नर्मदायां त्रसद्दस्युमजीजनत् ॥ 16 ॥ 245

त्रसद्दस्युतस्सम्भूतोऽनरण्यः, यं रावणो दिग्विजये जघान ॥ 17 ॥ 246

अनरण्यस्य पृषदश्वः पृषदश्वस्य हर्यश्वः पुत्रोऽभवत् ॥ 18 ॥ 247

तस्य च हस्तः पुत्रोऽभवत् ॥ 19 ॥ 248

ततश्च सुमनास्तस्यापि त्रिधन्वा त्रिधन्वनस्त्रय्यारुणिः ॥ 20 ॥ 249

त्रय्यारुणेस्सत्यव्रतः, योऽसौ त्रिशङ्कुसंज्ञामवाप ॥ 21 ॥ 250

स चाण्डालतामुपगतश्च ॥ 22 ॥ 251

द्वादशवार्षिक्यामनावृष्ट्यां विश्वामित्रकलत्रापत्यपोषणार्थं चाण्डालप्रतिग्रहपरिहरणाय च जाह्नवीतीरन्यग्रोधे मृगमांसमनुदिनं बबन्ध ॥ 23 ॥ 252

स तु परितुष्टेन विश्वामित्रेण सशरीरस्स्वर्गमारोपितः ॥ 24 ॥ 253

त्रिशङ्कोर्हरिश्चन्द्रस्तस्माच्च रोहिताश्वस्ततश्च हरितो हरितस्य
चञ्चुश्चञ्चोर्विजयवसुदेवौ रुरुको विजयाद्रुरुकस्य वृकः॥ 25॥ 254

ततो वृकस्य बाहुर्योऽसौ हैहयतालजङ्घादिभिः पराजितोऽन्तर्वल्या महिष्या
सह वनं प्रविवेश॥ 26॥ 255

तस्याश्च सपत्न्या गर्भस्तम्भनाय गरो दत्तः॥ 27॥ 256

तेनास्या गर्भस्सप्तवर्षाणि जठर एव तस्थौ॥ 28॥ 257

स च बाहुर्वृद्धभावादौर्वाश्रमसमीपे ममार॥ 29॥ 258

सा तस्य भार्या चितां कृत्वा तमारोप्यानुमरणकृतनिश्चयाऽभूत्॥ 30॥ 259

अथैतामतीतानागतवर्त्तमानकालत्रयवेदी
भगवानौर्वस्स्वाश्रमान्निर्गत्याब्रवीत्॥ 31॥ 260

अलमलमनेनासद्ग्राहेणाखिलभूमण्डलपतिरतिवीर्यपराक्रमो
नैकयज्ञकृदरातिपक्षक्षयकर्त्ता तवोदरे चक्रवर्ती तिष्ठति॥ 32॥ 261

नैवमतिसाहसाध्यवसायिनी भवती भवत्वित्युक्ता सा
तस्मादनुमरणनिर्बन्धाद्विरराम॥ 33॥ 262

तेनैव च भगवता स्वाश्रममानीता॥ 34॥ 263

तत्र कतिपयदिनाभ्यन्तरे च सहैव तेन गरेणाति तेजस्वी बालको जज्ञे॥ 35॥ 264

तस्यौर्वो जातकर्मादिक्रिया निष्पाद्य सगर इति नाम चकार॥ 36॥ 265

कृतोपनयनं चैनमौर्वो वेदशास्त्राण्यस्त्रं चाग्नेयं भार्गवाख्यमध्यापयामास॥ 37॥ 266

उत्पन्नबुद्धिश्च मातरमब्रवीत्॥ 38॥ 267

अम्ब कथमत्र वयं क्व वा तातोऽस्माकमित्येवमादिपृच्छन्तं माता सर्वमेवावोचत्॥ 39॥ 268

ततश्च पितृराज्यापहरणादमर्षितो हैहयतालजङ्घादिवधाय प्रतिज्ञामकरोत्॥ 40॥ 269

प्रायशश्च हैहयतालजङ्घाञ्जघान॥ 41॥ 270

शकयवनकाम्बोजपारदपह्लवाः हन्यमानास्तत्कुलगुरुं वसिष्ठं शरणं जग्मुः॥ 42॥ 271

अथैनान्वसिष्ठो जीवन्मृतकान् कृत्वा सगरमाह॥ 43॥ 272

वत्सालमेभिर्जीवन्मृतकैरनुसृतैः॥ 44॥ 273

एते च मयैव त्वत्प्रतिज्ञापरिपालनाय निजधर्मद्विजसंगपरित्यागं कारिताः॥ 45॥ 274

तथेति तद्गुरुवचनमभिनन्द्य तेषां वेषान्यत्वमकारयत्॥ 46॥ 275

यवनान्मुण्डितशिरसोऽर्द्धमुण्डिताञ्च्छकान् प्रलम्बकेशान् पारदान् पह्लवाञ्श्मश्रुधरान् निस्स्वाध्यायवषट्कारानेतानन्यांश्च क्षत्रियांश्चकार॥ 47॥ 276

एते चात्मधर्मपरित्यागाद्ब्राह्मणैः परित्यक्ता म्लेच्छतां ययुः॥ 48॥ 277

सगरोऽपि स्वमधिष्ठानमागम्यास्खलितचक्रस्सप्तद्वीपवतीमिमामुर्वी प्रशशास॥ 49॥ 278

॥ इति श्रीविष्णुपुराणे चतुर्थेंऽशे तृतीयोऽध्यायः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ चतुर्थेऽंशे चतुर्थोऽध्यायः ॥

श्रीपराशर उवाच

काश्यपदुहिता सुमतिर्विदर्भराजतनया केशिनी च द्वे भार्ये सगरस्यास्ताम् ॥ 1 ॥ 279

ताभ्यां चापत्यार्थमौर्वः परमेण समाधिनाराधितो वरमदात् ॥ 2 ॥ 280

एका वंशकरमेकं पुत्रमपरा षष्टिं पुत्रसहस्राणां जनयिष्यतीति यस्या यदभिमतं तदिच्छया गृह्यतामित्युक्ते केशिन्येकं वरयामास ॥ 3 ॥ 281

सुमतिः पुत्रसहस्राणि षष्टिं वव्रे ॥ 4 ॥ 282

तथेत्युक्ते अल्पैरहोभिः केशिनी पुत्रमेकमसमञ्जसनामान वंशकरमसूत ॥ 5 ॥ 283

काश्यपतनयायास्तु सुमत्याः षष्टिः पुत्रसहस्राण्यभवन् ॥ 6 ॥ 284

तस्मादसमञ्जसादंशुमान्नाम कुमारो जज्ञे ॥ 7 ॥ 285

स त्वसमञ्जसो बालो बाल्यादेवासद्वृत्तोऽभूत् ॥ 8 ॥ 286

पिता चास्याचिन्तयदयमतीतबाल्यः सुबुद्धिमान् भविष्यतीति ॥ 9 ॥ 287

अथ तत्रापि च वयस्यतीते असच्चरितमेनं पिता तत्याज ॥ 10 ॥ 288

तान्यपि षष्टिः पुत्रसहस्राण्यसमञ्जसचरितमेवानुचक्रुः ॥ 11 ॥ 289

ततश्चासमञ्जसचरितानुकारिभिस्सागरैरपध्वस्तयज्ञादिसन्मार्गे जगति
देवास्सकलविद्यामयमसंस्पृष्टमशेषदोषैर्भगवतः पुरुषोत्तमस्यांशभूतं
कपिलं प्रणम्य तदर्थमूचुः ॥ 12 ॥ 290

भगवन्नेऽभिस्सगरतनयैरसमञ्जसचरितमनुगम्यते ॥ 13 ॥ 291

कथमेभिरसद्वृत्तमनुसरद्भिर्जगद्भविष्यतीति ॥ 14 ॥ 292

अत्यार्त्तजगत्परित्राणाय च भगवतोऽत्र शरीरग्रहणमित्याकर्ण्य
भगवानाहाल्पैरेव दिनैर्विनङ्क्ष्यन्तीति ॥ 15 ॥ 293

अत्रान्तरे च सगरो हयमेधमारभत ॥ 16 ॥ 294

तस्य च पुत्रैरधिष्ठितमस्याश्वं कोऽप्यपहृत्य भुवो बिलं प्रविवेश ॥ 17 ॥ 295

ततस्तत्तनयाश्चाश्वखुरगतिनिर्बन्धेनावनीमेकैको योजनं चखुः ॥ 18 ॥ 296

पाताले चाश्वं परिभ्रमन्तं तमवनीपतितनयास्ते ददृशुः ॥ 19 ॥ 297

नातिदूरेऽवस्थितं च भगवन्तमपघने शरत्कालेऽर्कमिव
तेजोभिरनवरतमूर्ध्वमधश्चाशेष दिशश्चोद्भासयमानं
कपिलर्षिमपश्यन् ॥ 20 ॥ 298

हयहर्त्तारं ततश्चोद्यतायुधा दुरात्मानोऽयमस्मदपकारी यज्ञविघ्नकारी हन्यतां
हयहर्त्ता हन्यतामित्यवोचन्नभ्यधावंश्च ॥ 21 ॥ 299

ततस्तेनापि भगवता
किञ्चिदीषत्परिवर्त्तितलोचनेनावलोकितास्स्वशरीरसमुत्थेनाऽग्निना
दह्यमाना विनेशुः ॥ 22 ॥ 300

सगरोऽप्यवगम्याश्वानुसारि तत्पुत्रबलमशेषं परमर्षिणा कपिलेन तेजसा
दग्धं ततोंऽशुमन्तमसमञ्जसपुत्रमश्वानयनाय युयोज ॥ 23 ॥ 301

स सगरतनयखातमार्गेण तु भक्तिनम्रस्तदा कपिलमुपगम्य तुष्टाव ॥ 24 ॥ 302

अथैनं अथांशुमानपि भगवानाह ॥ 25 ॥ 303

गच्छैनं पितामहायाश्वं प्रापय वरं वृणीष्व च पुत्रक पौत्रश्च ते स्वर्गाद्गङ्गां भुवमानेष्यत इति ॥ 26 ॥ 304

स्वर्यातानां ब्रह्मदण्डहतानामस्मत्पितॄणामस्वर्गयोग्यानां स्वर्गप्राप्तिकरं वरमस्माकं प्रयच्छेति प्रत्याह ॥ 27 ॥ 305

तदाकर्ण्य तं च भगवानाह उक्तमेवैतन्मयाद्य पौत्रस्ते त्रिदिवाद्गङ्गां भुवमानेष्यतीति ॥ 28 ॥ 306

तदम्भसा च संस्पृष्टेष्वस्थिभस्मसु एते च स्वर्गमारोक्ष्यन्ति ॥ 29 ॥ 307

भगवद्विष्णुपादांगुष्ठनिर्गतस्य जलस्यैतन्माहात्म्यम् ॥ 30 ॥ 308

यन्न केवलमभिसन्धिपूर्वकं स्नानाद्युपभोगेषूपकारक - मनभिसंहितमप्यपेतप्राणस्यास्थिचर्मस्नायुकेशाद्युपस्पृष्टं शरीरजमपि पतितं सद्यश्शरीरिणं स्वर्गं नयतीत्युक्तः प्रणम्य भगवतेऽश्वमादाय पितामहहि यज्ञमाजगाम ॥ 31 ॥ 309

सगरोऽप्यश्वमासाद्य तं यज्ञं समापयामास ॥ 32 ॥ 310

सागरं चात्मजप्रीत्या पुत्रत्वे कल्पितवान् ॥ 33 ॥ 311

तस्यांशुमतो दिलीपः पुत्रोऽभवत् ॥ 34 ॥ 312

दिलीपस्य भगीरथः योऽसौ गङ्गां स्वर्गादिहानीय भागीरथीसंज्ञां चकार ॥ 35 ॥ 313

भगीरथात्सुहोत्रस्सुहोत्राच्छुतः, तस्यापि नाभागः ततोऽम्बरीषः, तत्पुत्रस्सिन्धुद्वीपः सिन्धुद्वीपादयुतायुः ॥ 36 ॥ 314

तत्पुत्रश्च ऋतुपर्णः, योऽसौ नलसहायोऽक्षहृदयज्ञोऽभूत्॥ 37॥ 315

ऋतुपर्णपुत्रस्सर्वकामः॥ 38॥ 316

तत्तनयस्सुदासः॥ 39॥ 317

सुदासात्सौदासो मित्रसहनामा॥ 40॥ 318

स चाटव्यां मृगयार्थी पर्यटन् व्याघ्रद्वयमपश्यत्॥ 41॥ 319

ताभ्यां तद्वनमपमृगं कृतं मत्वैकं तयोर्बाणेन जघान॥ 42॥ 320

म्रियमाणश्चासावतिभीषणाकृतिरतिकरालवदनो राक्षसोऽभूत्॥ 43॥ 321

द्वितीयोऽपि प्रतिक्रियां ते करिष्यामीत्युक्त्वान्तर्धानं जगाम॥ 44॥ 322

कालेन गच्छता सौदासो यज्ञमयजत्॥ 45॥ 323

परिनिष्ठितयज्ञे आचार्ये वसिष्ठे निष्क्रान्ते तद्रक्षो वसिष्ठरूपमास्थाय
यज्ञावसाने मम नरमांसभोजनं देयमिति तत्संस्क्रियतां
क्षणादागमिष्यामीत्युक्त्वा निष्क्रान्तः॥ 46॥ 324

भूयश्च सूदवेषं कृत्वा राजाज्ञया मानुषं मांसं संस्कृत्य राज्ञे न्यवेदयत्॥ 47॥ 325

असावपि हिरण्यपात्रे मांसमादाय वसिष्ठागमनप्रतीक्षकोऽभवत्॥ 48॥ 326

आगताय वसिष्ठाय निवेदितवान्॥ 49॥ 327

स चाप्यचिन्तयदहो अस्य राज्ञो दौश्शील्यं येनैतन्मांसमस्माकं प्रयच्छति
किमेतद्द्रव्यजातमिति ध्यानपरोऽभवत्॥ 50॥ 328

अपश्यच्च तन्मांसं मानुषम्॥ 51॥ 329

अतः क्रोधकलुषीकृतचेता राजनि शापमुत्ससर्ज॥ 52॥ 330

यस्मादभोज्यमेतदस्मद्विधानां तपस्विनामवगच्छन्नपि भवान्मह्यं ददाति तस्मात्तवैवात्र लोलुपता भविष्यतीति ॥ 53 ॥ 331

अनन्तरं च तेनापि भगवतैवाभिहितोऽस्मीत्युक्ते किं किं मयाभिहितमिति मुनिः पुनरपि समाधौ तस्थौ ॥ 54 ॥ 332

समाधिविज्ञानावगतार्थश्चानुग्रहं तस्मै चकार नात्यन्तिकमेतद्द्वादशाब्दं तव भोजनं भविष्यतीति ॥ 55 ॥ 333

असावपि प्रतिगृह्योदकाञ्जलिं मुनिशापप्रदानायोद्यतो भगवन्नयमस्मद्गुरुर्नार्हस्येनं कुलदेवताभूतमाचार्यं शप्तुमिति मदयन्त्या स्वपत्न्या प्रसादितस्सस्याम्बुदरक्षणार्थं तच्छापाम्बु नोर्व्यां न चाकाशे चिक्षेप किं तु तेनैव स्वपदौ सिषेच ॥ 56 ॥ 334

तेन च क्रोधाश्रितेनाम्बुना दग्धच्छायौ तत्पादौ कल्माषतामुपगतौ ततस्स कल्माषपादसंज्ञामवाप ॥ 57 ॥ 335

वसिष्ठशापाच्च षष्ठे षष्ठे काले राक्षसस्वभावमेत्याटव्यां पर्यटन्ननेकशो मानुषानभक्षयत् ॥ 58 ॥ 336

एकदा तु कञ्चिन्मुनिमृतुकाले भार्यासंगतं ददर्श ॥ 59 ॥ 337

तयोश्च तमतिभीषणं राक्षसस्वरूपमवलोक्य त्रासाद्दम्पत्योः प्रधावितयोर्ब्राह्मणं जग्राह ॥ 60 ॥ 338

ततस्सा ब्राह्मणी बहुशस्तमभियाचितवती ॥ 61 ॥ 339

प्रसीदेक्ष्वाकुकुलतिलकभूतस्त्वं महाराजो मित्रसहो न राक्षसः ॥ 62 ॥ 340

नार्हसि स्त्रीधर्मसुखाभिज्ञो मय्यकृतार्थायामस्मद्भर्त्तारं हन्तुमित्येवं बहुप्रकारं तस्यां विलपन्त्यां व्याघ्रः पशुमिवारण्येऽभिमतं तं ब्राह्मणमभक्षयत् ॥ 63 ॥ 341

ततश्चातिकोपसमन्विता ब्राह्मणी तं राजानं शशाप ॥ 64 ॥ 342

यस्मादेवं मय्यतृप्तायां त्वयायं मत्पतिर्भक्षितः तस्मात्त्वमपि कामोपभोगप्रवृत्तोऽन्तं प्राप्स्यसीति ॥ 65 ॥ 343

शप्त्वा चैवं साग्निं प्रविवेश ॥ 66 ॥ 344

ततस्तस्य द्वादशाब्दपर्यये विमुक्तशापस्य स्त्रीविषयाभिलाषिणो मदयन्ती तं स्मारयामास ॥ 67 ॥ 345

ततः परमसौ स्त्रीभोगं तत्याज ॥ 68 ॥ 346

वसिष्ठश्चापुत्रेण राज्ञा पुत्रार्थमभ्यर्थितो मदयन्त्यां गर्भाधानं चकार ॥ 69 ॥ 347

यदा च सप्तवर्षाण्यसौ गर्भो न जज्ञे ततस्तं गर्भमश्मना सा देवी जघान ॥ 70 ॥ 348

पुत्रश्चाजायत ॥ 71 ॥ 349

तस्य चाश्मक इत्येव नामाभवत् ॥ 72 ॥ 350

अश्मकस्य मूलको नाम पुत्रोऽभवत् ॥ 73 ॥ 351

योऽसौ निःक्षत्रे क्ष्मातलेऽस्मिन् क्रियमाणे स्त्रीभिर्विवस्त्राभिः परिवार्य रक्षितस्ततस्तं नारीकवचमुदाहरन्ति ॥ 74 ॥ 352

मूलकाद्दशरथस्तस्मादिलिविलस्ततश्चविश्वसहः ॥ 75 ॥ 353

तस्माच्च खट्वाङ्गो योऽसौ देवासुरसङ्ग्रामे देवैरभ्यर्थितोऽसुराञ्जघान ॥ 76 ॥ 354

स्वर्गे च कृतप्रियैर्देवैर्वरग्रहणाय चोदितः प्राह ॥ 77 ॥ 355

यद्यवश्यं वरो ग्राह्यस्तन्ममायुः कथ्यतामिति ॥ 78 ॥ 356

अनन्तरं च तैरुक्तं एकमुहूर्त्तप्रमाणं तवायुरित्युक्तोऽथास्खलितगतिना विमानेन लघिमगुणो मर्त्यलोकमागम्येदमाह ॥ 79 ॥ 357

यथा न ब्राह्मणेभ्यस्सकाशादात्मापि मे प्रियतरो न च स्वधर्मोल्लङ्घनं मया कदाचिदप्यनुष्ठितं न च
सकलदेवमानुषपशुपक्षिवृक्षादिकेष्वच्युतव्यतिरेकवती दृष्टिर्ममाभूत् तथा तमेवं मुनिजनानुस्मृतं भगवन्तमस्खलितगतिः प्रापयेयमित्यशेषदेवगुरौ भगवत्यनिर्देश्यवपुषि सत्तामात्रात्मन्यात्मानं परमात्मनि वासुदेवाख्ये युयोज तत्रैव च लयमवाप ॥ 80 ॥ 358

अत्रापि श्रूयते श्लोको गीतस्सप्तर्षिभिः पुरा।
खट्वांगेन समो नान्यः कश्चिदुर्व्यां भविष्यति ॥ 81 ॥ 359

येन स्वर्गादिहागम्य मुहूर्त्तं प्राप्य जीवितम्।
त्रयोऽभिसंहिता लोका बुद्ध्या सत्येन चैव हि ॥ 82 ॥ 360

खट्वाङ्गाद्दीर्घबाहुः पुत्रोऽभवत् ॥ 83 ॥ 361

ततो रघुरभवत् ॥ 84 ॥ 362

तस्मादप्यजः ॥ 85 ॥ 363

अजाद्दशरथः ॥ 86 ॥ 364

तस्यापि भगवानब्जनाभो जगतः स्थित्यर्थमात्मांशेन रामलक्ष्मणभरतशत्रुघ्नरूपेण चतुर्द्धा पुत्रत्वमायासीत् ॥ 87 ॥ 365

रामोऽपि बाल एव विश्वामित्रयागरक्षणाय गच्छंस्ताटकां जघान ॥ 88 ॥ 366

यज्ञे च मारीचमिषुवाताहतं समुद्रे चिक्षेप ॥ 89 ॥ 367

सुबाहुप्रमुखांश्च क्षयमनयत् ॥ 90 ॥ 368

दर्शनमात्रेणाहल्यामपापां चकार ॥ 91 ॥ 369

जनकगृहे च माहेश्वरं चापमनायासेन बभञ्ज ॥ 92 ॥ 370

सीतामयोनिजां जनकराजतनयां वीर्यशुल्कां लेभे ॥ 93 ॥ 371

सकलक्षत्रियक्षयकारिणमशेषहैहयकुलधूमकेतुभूतं च
परशुराममपास्तवीर्यबलावलेपं चकार ॥ 94 ॥ 372

पितृवचनाद्यागणितराज्याभिलाषो भ्रातृभार्यासमेतो वनं प्रविवेश ॥ 95 ॥ 373

विराधखरदूषणादीन् कबन्धवालिनौ च निजघान ॥ 96 ॥ 374

बद्ध्वा चाम्भोनिधिमशेषराक्षसकुलक्षयं कृत्वा दशाननापहृतां भार्यां
तद्बधादपहृतऽकलंकामप्यनलप्रवेशशुद्धामशेषदेवसङ्घैः स्तूयमानशीलां
जनकराजकन्यामयोध्यामानिन्ये ॥ 97 ॥ 375

ततश्चाभिषेकमङ्गलं मैत्रेय वर्षशतेनापि वक्तुं न शक्यते सङ्क्षेपेण
श्रूयताम् ॥ 98 ॥ 376

लक्ष्मणभरतशत्रुघ्नविभीषणसुग्रीवाङ्गदजाम्बवद्धनुमत्प्रभृतिभिस्समुत्फुल्ल -
वदनैश्छत्रचामरादियुतैः सेव्यमानो
दाशरथिर्ब्रह्मेन्द्राग्नियमनिर्ऋतिवरुण -
वायुकुबेरेशानप्रभृतिभिस्सर्वामरैर्वसिष्ठवामदेव -
वाल्मीकिमार्कण्डेयविश्वामित्रभरद्वाजागस्त्यप्रभृतिभिर्मुनिवरैः
ऋग्यजुस्सामाथर्वभिस्संस्तूयमानो
नृत्यगीतवाद्याद्यखिललोकमङ्गलवाद्यैर्वीणावेणुमृदङ्गभेरीपटहशङ्ख -
काहलगोमुखप्रभृतिभिस्सुनादैस्समस्तभूभृतां मध्ये सकललोकरक्षार्थं
यथोचितमभिषिक्तो दाशरथिः कोसलेन्द्रो रघुकुलतिलको जानकीप्रियो
भ्रातृत्रयप्रियस्सिंहासनगत एकादशाब्दसहस्रं राज्यमकरोत् ॥ 99 ॥ 377

भरतोऽपि गन्धर्वविषयसाधनाय गच्छन् संग्रामे गन्धर्वकोटीस्तिस्रो जघान ॥ **100** ॥ 378

शत्रुघ्नेनाप्यमितबलपराक्रमो मधुपुत्रो लवणो नाम राक्षसो निहतो मथुरा च निवेशिता ॥ **101** ॥ 379

इत्येवमाद्यतिबलपराक्रमविक्रमणैरतिदुष्टसंहारिणोऽशेषस्य जगतो निष्पादितस्थितयो रामलक्ष्मणभरतशत्रुघ्नाः पुनरपि दिवमारूढाः ॥ **102** ॥ 380

येऽपि तेषु भगवदंशेष्वनुरागिणः कोसलनगरजानपदास्तेऽपि तन्मनसस्तत्सालोक्यतामवापुः ॥ **103** ॥ 381

अतिदुष्टसंहारिणो रामस्य कुशलवौ द्वौ पुत्रौ लक्ष्मणस्याङ्गदचन्द्रकेतू तक्षपुष्कलौ भरतस्य सुबाहुशूरसेनौ शत्रुघ्नस्य ॥ **104** ॥ 382

कुशस्यातिथिरतिथेरपि निषधः पुत्रोऽभूत् ॥ **105** ॥ 383

निषधस्याप्यनलस्तस्मादपि नभाः नभसः पुण्डरीकस्तत्तनयः क्षेमधन्वा तस्य च देवानीकस्तस्याप्यहीनकोऽहीनकस्यापि रुरुस्तस्य च पारियात्रकः पारियात्रकाद्देवलो देवलाद्बलः, तस्याप्युत्कः, उत्काच्च वज्रनाभस्तस्माच्छङ्खणस्तस्माद्युषिताश्वस्ततश्च विश्वसहो जज्ञे ॥ **106** ॥ 384

तस्माद्धिरण्यनाभो यो महायोगीश्वराज्जैमिनेश्शिष्याद्याज्ञवल्क्याद्योगमवाप ॥ **107** ॥ 385

हिरण्यनाभस्य पुत्रः पुष्यस्तस्माद्ध्रुवसन्धिस्ततस्सुदर्शन - स्तस्मादग्निवर्णस्ततश्शीघ्रगस्तस्मादपि मरुः पुत्रोऽभवत् ॥ **108** ॥ 386

योऽसौ योगमास्थायाद्यापि कलापग्राममाश्रित्य तिष्ठति ॥ **109** ॥ 387

आगामियुगे सूर्यवंशक्षत्रप्रवर्त्तयिता भविष्यति ॥ **110** ॥ 388

तस्यात्मजः प्रसुश्रुतस्तस्यापि सुसन्धिस्ततश्चाप्यमर्षस्तस्य च सहस्वांस्ततश्च विश्वभवः॥ **111** ॥ 389

तस्य बृहद्बलः योऽर्जुनतनयेनाभिमन्युना भारतयुद्धे क्षयमनीयत॥ **112** ॥ 390

एते इक्ष्वाकुभूपालाः प्राधान्येन मयेरिताः।
एतेषां चरितं शृण्वन् सर्वपापैः प्रमुच्यते॥ **113** ॥ 391

॥ इति श्रीविष्णुपुराणे चतुर्थेंऽशे चतुर्थोऽध्यायः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ चतुर्थेंऽशे पञ्चमोऽध्यायः ॥

श्रीपराशर उवाच

इक्ष्वाकुतनयो योऽसौ निमिर्नाम सहस्रं वत्सरं सत्रमारेभे ॥ 1 ॥ 392

वसिष्ठं च होतारं वरयामास ॥ 2 ॥ 393

तमाह वसिष्ठोऽहमिन्द्रेण पञ्चवर्षशतयागार्थं प्रथमं वृतः ॥ 3 ॥ 394

तदनन्तरं प्रतिपाल्यतामागतस्तवापि ऋत्विग्भविष्यामीत्युक्ते स पृथिवीपतिर्न किञ्चिदुक्तवान् ॥ 4 ॥ 395

वसिष्ठोऽप्यनेन समन्वीप्सितमित्यमरपतेर्यागमकरोत् ॥ 5 ॥ 396

सोऽपि तत्काल एवान्यैर्गौतमादिभिर्यागमकरोत् ॥ 6 ॥ 397

समाप्ते चामरपतेर्यागे त्वरया वसिष्ठो निमियज्ञं करिष्यामीत्याजगाम ॥ 7 ॥ 398

तत्कर्मकर्तृत्वं च गौतमस्य दृष्ट्वा स्वपते तस्मै राज्ञे मां प्रत्याख्यायैतदनेन गौतमाय कर्मान्तरं समर्पितं यस्मात्तस्मादयं विदेहो भविष्यतीति शापं ददौ ॥ 8 ॥ 399

प्रबुद्धश्चासाववनिपतिरपि प्राह ॥ 9 ॥ 400

यस्मान्मामसम्भाष्याज्ञानत एव शयानस्य शापोत्सर्गमसौ शापोत्सर्गमसौ दुष्टगुरुश्चकार तस्मात्तस्यापि देहः पतिष्यतीति शापं दत्त्वा देहमत्यजत् ॥ 10 ॥ 401

तच्छापाच्च मित्रावरुणयोस्तेजसि वसिष्ठस्य चेतः प्रविष्टम्॥ 11॥ 402

उर्वशीदर्शनादुद्भूतबीजप्रपातयोस्तयोस्सकाशाद्वसिष्ठो देहमपरं लेभे॥ 12॥ 403

निमेरपि तच्छरीरमतिमनोहरगन्धतैलादिभिरुपसंस्क्रियमाणं नैव क्लेदादिकं दोषमवाप सद्यो मृत इव तस्थौ॥ 13॥ 404

यज्ञसमाप्तौ भागग्रहणाय देवानागतानृत्विज ऊचुर्यजमानाय वरो दीयतामिति॥ 14॥ 405

देवैश्च छन्दितोऽसौ निमिराह॥ 15॥ 406

भगवन्तोऽखिलसंसारदुःखहन्तारः॥ 16॥ 407

न ह्येतादृगन्यद्दुःखमस्ति यच्छरीरात्मनोर्वियोगे भवति॥ 17॥ 408

तदहमिच्छामि सकललोकलोचनेषु वस्तुं न पुनश्शरीरग्रहणं कर्तुमित्येवमुक्तैर्देवैरसावशेषभूतानां नेत्रेष्ववतारितः॥ 18॥ 409

ततो भूतान्युन्मेषनिमेषं चक्रुः॥ 19॥ 410

ततश्च अपुत्रस्य च भूभुजः शरीरमराजक भीरवो मुनयोऽरण्या ममन्थुः॥ 20॥ 411

तत्र च कुमारो जज्ञे॥ 21॥ 412

जननाज्जनकसंज्ञां चावाप॥ 22॥ 413

अभूद्विदेहोऽस्य पितेति वैदेहः, मथनान्मिथिरिति॥ 23॥ 414

तस्योदावसुः पुत्रोऽभवत्॥ 24॥ 415

उदावसोर्नन्दिवर्द्धनस्ततस्सुकेतुः तस्माद्देवरातस्ततश्च बृहदुक्थः तस्य च महावीर्यस्तस्यापि सुधृतिः॥ 25॥ 416

धृष्टकेतुरजायत ॥ 26 ॥ 417

धृष्टकेतोर्हर्यश्वस्तस्य च मनुर्मनोः प्रतीकः, तस्मात्कृतरथस्तस्य देवमीढः,
तस्य च विबुधो विबुधस्य महाधृतिस्ततश्च कृतरातः, ततो महारोमा तस्य
सुवर्णरोमा तत्पुत्रो ह्रस्वरोमा ह्रस्वरोम्णस्सीरध्वजोऽभवत् ॥ 27 ॥ 418

तस्य पुत्रार्थं यजनभुवं कृषतः सीरे सीता दुहिता समुत्पन्ना ॥ 28 ॥ 419

सीरध्वजस्य भ्राता सांकाश्याधिपतिः कुशध्वजनामासीत् ॥ 29 ॥ 420

सीरध्वजस्यापत्यं भानुमान् भानुमतश्शतद्युम्नः तस्य तु शुचिः
तस्माद्योर्जनामा पुत्रो जज्ञे ॥ 30 ॥ 421

तस्यापि शतध्वजः, ततः कृतिः कृतेरञ्जनः, तत्पुत्रः कुरुजित् ततोऽरिष्टनेमिः
तस्माच्छ्रुतायुः श्रुतायुषः सुपार्श्वः तस्मात्सृञ्जयः, ततः क्षेमावी
क्षेमाविनोऽनेनाः तस्माद्भीमरथः, तस्य सत्यरथः,
तस्मादुपगुरुपगोरुपगुप्तः, तत्पुत्रः स्वागतस्तस्य च स्वानन्दः, तस्माच्च
सुवर्चाः, तस्य च सुपार्श्वः, तस्यापि सुभाषः, तस्य सुश्रुतः
तस्मात्सुश्रुताज्जयः तस्य पुत्रो विजयो विजयस्य ऋतः, ऋतात्सुनयः
सुनयाद्वीत हव्यः तस्माद्धृतिर्धृतेर्बहुलाश्वः, तस्य पुत्रः कृतिः ॥ 31 ॥ 422

कृतौ सन्तिष्ठतेऽयं जनकवंशः ॥ 32 ॥ 423

इत्येते मैथिलाः ॥ 33 ॥ 424

प्रायेणैते आत्मविद्याश्रयिणो भूपाला भवन्ति ॥ 34 ॥ 425

॥ इति श्रीविष्णुपुराणे चतुर्थेऽंशे पञ्चमोऽध्यायः ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ चतुर्थेऽंशे षष्ठोऽध्यायः ॥

श्रीमैत्रेय उवाच

सूर्यस्य वंश्या भगवन्कथिता भवता मम।
सोमस्याप्यखिलान्वंश्याञ्छ्रोतुमिच्छामि पार्थिवान्॥ 1॥ 426

कीर्त्यते स्थिरकीर्तीनां येषामद्यापि सन्ततिः।
प्रसादसुमुखस्तान्मे ब्रह्मन्नाख्यातुमर्हसि॥ 2॥ 427

श्रीपराशर उवाच

श्रूयतां मुनिशार्दूल वंशः प्रथिततेजसः।
सोमस्यानुक्रमात्ख्याता यत्रोर्वीपतयोऽभवन्॥ 3॥ 428

अयं हि वंशोऽतिबलपराक्रमद्युतिशीलचेष्टावद्भिरति -
गुणान्वितैर्नहुषययातिकार्तवीर्यार्जुनादिभिर्भूपालैरलङ्कृतस्तमहं कथयामि
श्रूयताम्॥ 4॥ 429

अखिलजगत्स्रष्टुर्भगवतो नारायणस्य नाभिसरोजसमुद्भवाब्जयोनेर्ब्रह्मणः
पुत्रोऽत्रिः॥ 5॥ 430

अत्रेस्सोमः॥ 6॥ 431

तं च भगवानब्जयोनिः अशेषौषधिद्विजनक्षत्राणामाधिपत्येऽभ्यषेचयत्॥ 7॥ 432

स च राजसूयमकरोत्॥ 8॥ 433

तत्प्रभावादत्युत्कृष्टाधिपत्याधिष्ठातृत्वाच्चैनं मद आविवेश॥ 9॥ 434

मदावलेपाच्च सकलदेवगुरोबृहस्पतेस्तारां नाम पत्नीं जहार ॥ 10 ॥ 435

बहुशश्च बृहस्पतिचोदितेन भगवता ब्रह्मणा चोद्यमानः सकलैश्च देवर्षिभिर्याच्यमानोऽपि न मुमोच ॥ 11 ॥ 436

तस्य चन्द्रस्य च बृहस्पतेर्द्वेषादुशना पार्ष्णिग्राहोऽभूत् ॥ 12 ॥ 437

अङ्गिरसश्च सकाशादुपलब्धविद्यो भगवान्रुद्रो बृहस्पतेः साहाय्यमकरोत् ॥ 13 ॥ 438

यतश्चोशना ततो जम्भकुम्भाद्याः समस्ता एव दैत्यदानवनिकाया महान्तमुद्यमं चक्रुः ॥ 14 ॥ 439

बृहस्पतेरपि सकलदेवसैन्ययुतः सहायः शक्रोऽभवत् ॥ 15 ॥ 440

एवं च तयोरतीवोग्रसंग्रामस्तारानिमित्तस्तारकामयो नामाभूत् ॥ 16 ॥ 441

जगाम ॥ 17 ॥ 442

ततश्च समस्तशस्त्राण्यसुरेषु रुद्रपुरोगमा देवा देवेषु चाशेषदानवा मुमुचुः ॥ 18 ॥ 443

एवं देवासुराहवसंक्षोभक्षुब्धहृदयमशेषमेव जगद्ब्रह्माणं शरणं ततश्च भगवानब्जयोनिरप्युशनसं शङ्करमसुरान्देवांश्च निवार्य बृहस्पतये तारामदापयत् ॥ 19 ॥ 444

तां चान्तःप्रसवामवलोक्य बृहस्पतिरप्याह ॥ 20 ॥ 445

नैष मम क्षेत्रे भवत्यान्यस्य सुतो धार्यस्समुत्सृजैनमलमलमतिधाष्ट्र्येनेति ॥ 21 ॥ 446

स सा च तेनैवमुक्तातिपतिव्रता भर्तृवचनानन्तरं तमिषीकास्तम्बे गर्भमुत्ससर्ज ॥ 22 ॥ 447

चोत्सृष्टमात्र एवातितेजसा देवानां तेजांस्याचिक्षेप ॥ 23 ॥ 448

बृहस्पतिमिन्दुं च तस्य कुमारस्यातिचारुतया साभिलाषौ दृष्ट्वा देवास्समुत्पन्नसन्देहास्तारां पप्रच्छुः ॥ 24 ॥ 449

सत्यं कथयास्माकमिति सुभगे सोमस्याथ वा बृहस्पतेरयं पुत्र इति ॥ 25 ॥ 450

एवं तैरुक्ता सा तारा हिया किञ्चिन्नोवाच ॥ 26 ॥ 451

बहुशोऽप्यभिहिता यदासौ देवेभ्यो नाचचक्षे ततस्स कुमारस्तां शप्तुमुद्यतः प्राह ॥ 27 ॥ 452

दुष्टेऽम्ब कस्मान्मम तातं नाख्यासि ॥ 28 ॥ 453

अद्यैव ते व्यलीकलज्जावत्यास्तथा शास्तिमहं करोमि ॥ 29 ॥ 454

यथा च नैवमद्याप्यतिमन्थरवचना भविष्यसीति ॥ 30 ॥ 455

अथ भगवान् पितामहः तं कुमारं सन्निवार्य स्वयमपृच्छत्तां ताराम् ॥ 31 ॥ 456

कथय वत्से कस्यायमात्मजः सोमस्य वा बृहस्पतेर्वा इत्युक्ता लज्जमानाह सोमस्येति ॥ 32 ॥ 457

ततः प्रस्फुरदुच्छ्वसितामलकपोलकान्तिर्भगवानुडुपतिः कुमारमालिंग्य साधु साधु वत्स प्राज्ञोऽसीति बुध इति तस्य च नाम चक्रे ॥ 33 ॥ 458

तदाख्यातमेवैतत् स च यथेलायामात्मजं पुरूरवसमुत्पादयामास ॥ 34 ॥ 459

पुरूरवास्त्वतिदानशीलोऽतियज्वातितेजस्वी। यं सत्यवादिनमतिरूपवन्तं मनस्विनं मित्रावरुणशापान्मानुषे लोके मया वस्तव्यमिति कृतमतिरुर्वशी ददर्श ॥ 35 ॥ 460

दृष्टमात्रे च तस्मिन्नपहाय मानमशेषमपास्य स्वर्गसुखाभिलाषं तन्मनस्का भूत्वा तमेवोपतस्थे ॥ 36 ॥ 461

सोऽपि च तामतिशयितसकललोकस्त्रीकान्तिसौकुमार्यलावण्यगतिविलास - हासादिगुणामवलोक्य तदायत्तचित्तवृत्तिर्बभूव ॥ 37 ॥ 462

उभयमपि तन्मनस्कमनन्यदृष्टि परित्यक्तसमस्तान्यप्रयोजनमभूत् ॥ 38 ॥ 463

राजा तु प्रागल्भ्यात्तामाह ॥ 39 ॥ 464

सुभ्रु त्वामहमभिकामोऽस्मि प्रसीदानुरागमुद्वहेत्युक्ता लज्जावखण्डितमुर्वशी तं प्राह ॥ 40 ॥ 465

भवत्वेवं यदि मे समयपरिपालनं भवान् करोतीत्याख्याते पुनरपि तामाह ॥ 41 ॥ 466

आख्याहि मे समयमिति ॥ 42 ॥ 467

अथ पृष्टा पुनरप्यब्रवीत् ॥ 43 ॥ 468

शयनसमीपे ममोरणकद्वयं पुत्रभूतं नापनेयम् ॥ 44 ॥ 469

भवांश्च मया न नग्नो द्रष्टव्यः ॥ 45 ॥ 470

घृतमात्रं च ममाहार इति ॥ 46 ॥ 471

एवमेवेति भूपतिरप्याह ॥ 47 ॥ 472

तया सह स चावनिपतिरलकायां चैत्ररथादिवनेष्वमलपद्मखण्डेषु मानसादिसरस्स्वतिरमणीयेषु रममाणः षष्टिवर्षसहस्राण्यनुदिनप्रवर्द्धमानप्रमोदोऽनयत् ॥ 48 ॥ 473

उर्वशी च तदुपभोगात्प्रतिदिनप्रवर्द्धमानानुरागा अमरलोकवासेऽपि न स्पृहां चकार ॥ 49 ॥ 474

विना चोर्वश्या सुरलोकोऽप्सरसां सिद्धगन्धर्वाणां च नातिरमणीयोऽभवत् ॥ 50 ॥ 475

ततश्चोर्वशीपुरूरवसोस्समयविद्भिश्चावसुर्गन्धर्वनिशि शयनाभ्याशादेकमुरणकं जहार ॥ 51 ॥ 476

तस्याकाशे नीयमानस्योर्वशी समवेतो शब्दमशृणोत् ॥ 52 ॥ 477

एवमुवाच च ममानाथायाः पुत्रः केनापह्रियते कं शरणमुपयामीति ॥ 53 ॥ 478

तदाकर्ण्य राजा मां नग्नं देवी वीक्ष्यतीति न ययौ ॥ 54 ॥ 479

अथान्यमप्युरणकमादाय गन्धर्वा ययुः ॥ 55 ॥ 480

तस्याप्यपह्रियमाणस्याकर्ण्य शब्दमाकाशे पुनरप्यनाथास्म्यहमभर्तृका कापुरुषाश्रयेत्यार्त्तराविणी बभूव ॥ 56 ॥ 481

राजाप्यमर्षवशादन्धकारमेतदिति खड्गमादाय दुष्ट दुष्ट हतोऽसीति व्याहरन्नभ्यधावत् ॥ 57 ॥ 482

तावच्च गन्धर्वैरप्यतीवोज्ज्वला विद्युज्जनिता ॥ 58 ॥ 483

तत्प्रभया चोर्वशी राजानमपगताम्बरं दृष्ट्वापवृत्तसमया तत्क्षणादेवापक्रान्ता ॥ 59 ॥ 484

परित्यज्य तावप्युरणकौ गन्धर्वास्सुरलोकमुपगताः ॥ 60 ॥ 485

राजापि च तौ मेषावादायातिहृष्टमनाः स्वशयनमायातो नोर्वशीं ददर्श ॥ 61 ॥ 486

तां चापश्यन् व्यपगताम्बर एवोन्मत्तरूपो बभ्राम ॥ 62 ॥ 487

कुरुक्षेत्रे चाम्भोजसरस्यन्याभिश्चतसृभिरप्सरोभिस्समवेतामुर्वशीं ददर्श ॥ 63 ॥ 488

ततश्चोन्मत्तरूपो जाये हे तिष्ठ मनसि घोरे तिष्ठ वचसि कपटिके तिष्ठेत्येवमनेकप्रकारं सूक्तमवोचत् ॥ 64 ॥ 489

आह चोर्वशी ॥ 65 ॥ 490

महाराजालमनेनाविवेकचेष्टितेन ॥ 66 ॥ 491

अन्तर्वत्न्यहमब्दान्ते भवतात्रागन्तव्यं कुमारस्ते भविष्यति एकां च निशामहं त्वया सह वत्स्यामीत्युक्तः प्रहृष्टस्स्वपुरं जगाम ॥ 67 ॥ 492

तासां चाप्सरसामुर्वशी कथयामास ॥ 68 ॥ 493

अयं स पुरुषोत्कृष्टो येनाहमेतावन्तं कालमनुरागाकृष्टमानसा सहोषितेति ॥ 69 ॥ 494

एवमुक्तास्ताश्चाप्सरस ऊचुः ॥ 70 ॥ 495

साधु रूपमप्यनेन सहास्माकमपि सर्वकालमास्या भवेदिति ॥ 71 ॥ 496

साध्वस्य अब्दे च पूर्णे स राजा तत्राजगाम ॥ 72 ॥ 497

कुमारं चायुषमस्मै चोर्वशी ददौ ॥ 73 ॥ 498

दत्त्वा चैकां निशां तेन राज्ञा सहोषित्वा पञ्च पुत्रोत्पत्तये गर्भमवाप ॥ 74 ॥ 499

उवाचैनं राजानमस्मत्प्रीत्या महाराजाय सर्व एव गन्धर्वा वरदास्संवृत्ता व्रियतां च वर इति ॥ 75 ॥ 500

आह च राजा ॥ 76 ॥ 501

विजितसकलारातिरविहतेन्द्रियसामर्थ्यो बन्धुमानमितबलकोशोऽस्मि, नान्यदस्माकमुर्वशीसालोक्यात्प्राप्तव्यमस्ति तदहमनया सहोर्वश्या कालं नेतुमभिलषामीत्युक्ते गन्धर्वा राज्ञेऽग्निस्थालीं ददुः॥ 77॥ 502

ऊचुश्चैनमग्निमाम्नायानुसारी भूत्वा त्रिधा कृत्वोर्वशीसलोकतामनोरथमुद्दिश्य सम्यग्यजेथाः ततोऽवश्यमभिलषितमवाप्स्यसीत्युक्तस्तामग्निस्थालीमादाय जगाम॥ 78॥ 503

अन्तरटव्यामचिन्तयत्, अहो मेऽतीव मूढता किमहमकरवम्॥ 79॥ 504

वह्निस्थाली मयैषानीता नोर्वशीति॥ 80॥ 505

अथैनामटव्यामेवाग्निस्थालीं तत्याज स्वपुरं च जगाम॥ 81॥ 506

व्यतीतेऽर्द्धरात्रे विनिद्रश्चाचिन्तयत्॥ 82॥ 507

ममोर्वशीसालोक्यप्राप्त्यर्थमग्निस्थाली गन्धर्वैर्दत्ता सा च मयाटव्यां परित्यक्ता॥ 83॥ 508

तदहं तत्र तदाहरणाय यास्यामीत्युत्थाय तत्राप्युपगतो नाग्निस्थालीमपश्यत्॥ 84॥ 509

शमीगर्भं चाश्वत्थमग्निस्थालीस्थाने दृष्ट्वाचिन्तयत्॥ 85॥ 510

मयात्राग्निस्थाली निक्षिप्ता सा चाश्वत्थश्शमीगर्भोऽभूत्॥ 86॥ 511

तदेनमेवाहमग्निरूपमादाय स्वपुरमभिगम्यारणीं कृत्वा तदुत्पन्नाग्नेरुपास्तिं करिष्यामीति॥ 87॥ 512

एवमेव स्वपुरमभिगम्यारणिं चकार॥ 88॥ 513

तत्प्रमाणं चाङ्गुलैः कुर्वन् गायत्रीमपठत्॥ 89॥ 514

पठतश्चाक्षरसंख्यान्येवाङ्गुलान्यरण्यभवत् ॥ 90 ॥ 515

तत्राग्निं निर्मथ्याग्नित्रयमाम्नायानुसारी भूत्वा जुहाव ॥ 91 ॥ 516

उर्वशीसालोक्यं फलमभिसंहितवान् ॥ 92 ॥ 517

तेनैव चाग्निविधिना बहुविधान् यज्ञानिष्ट्वा गान्धर्वलोकानवाप्योर्वश्या सहावियोगमवाप ॥ 93 ॥ 518

एकोऽग्निरादावभवत् एकेन त्वत्र मन्वन्तरे त्रेधा प्रवर्तिताः ॥ 94 ॥ 519

॥ इति श्रीविष्णुपुराणे चतुर्थेंऽशे षष्ठोऽध्यायः ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ चतुर्थेंऽशे सप्तमोऽध्यायः ॥

श्रीपराशर उवाच

तस्याप्यायुर्धीमानमावसुर्विश्वावसुः श्रुतायुश्शतायुरयुतायुरितिसंज्ञाः षट् पुत्रा अभवन्॥ 1 ॥ 520

तथामावसोर्भीमनामा पुत्रोऽभवत्॥ 2 ॥ 521

भीमस्य काञ्चनः काञ्चनात्सुहोत्रस्तस्यापि जह्नुः॥ 3 ॥ 522

योऽसौ यज्ञवाटमखिलं गङ्गाम्भसाप्लावितमवलोक्य क्रोधसंरक्तलोचनो भगवन्तं यज्ञपुरुषमात्मनि परमेण समाधिना समारोप्याखिलामेव गङ्गामपिबत्॥ 4 ॥ 523

अथैनं देवर्षयः प्रसादयामासुः॥ 5 ॥ 524

दुहितृत्वे चास्य गङ्गामनयन्॥ 6 ॥ 525

जह्नोश्च सुमन्तुर्नाम पुत्रोऽभवत्॥ 7 ॥ 526

तस्याप्यजकस्ततो बलाकाश्वस्तस्मात्कुशास्तस्यापि कुशाम्बकुशनाभाधूर्त्तरजसो वसुश्चेति चत्वारः पुत्रा बभूवुः॥ 8 ॥ 527

तेषां कुशाम्बः शक्रतुल्यो मे पुत्रो भवेदिति तपश्चकार॥ 9 ॥ 528

तं चोग्रतपसमवलोक्य मा भवत्वन्योऽस्मत्तुल्यवीर्य इत्यात्मनैवास्येन्द्रः पुत्रत्वमगच्छत्॥ 10 ॥ 529

स गाधिर्नाम पुत्रः कौशिकोऽभवत्॥ 11॥ 530

गाधिश्च सत्यवतीं कन्यामजनयत्॥ 12॥ 531

तां च भार्गव ऋचीको वत्रे॥ 13॥ 532

गाधिरप्यतिरोषणायातिवृद्धाय ब्राह्मणाय
दातुमनिच्छन्नेकतश्श्यामकर्णानामिन्दुवर्चसामनिलरंहसामश्वानां सहस्रं
कन्याशुल्कमयाचत॥ 14॥ 533

तेनाप्यृषिणा वरुणसकाशादुपलभ्याश्वतीर्थोत्पन्नं तादृशमश्वसहस्रं
दत्तम्॥ 15॥ 534

ततस्तामृचीकः कन्यामुपयेमे॥ 16॥ 535

ऋचीकश्च तस्याश्चरुमपत्यार्थं चकार॥ 17॥ 536

तत्प्रसादितश्च तन्मात्रे क्षत्रवरपुत्रोत्पत्तये चरुमपरं साधयामास॥ 18॥ 537

एष चरुर्भवत्या अयमपरश्चरुस्त्वन्मात्रा सम्यगुपयोज्य इत्युक्त्वा वनं
जगाम॥ 19॥ 538

उपयोगकाले च तां माता सत्यवतीमाह॥ 20॥ 539

पुत्रि सर्व एवात्मपुत्रमतिगुणमभिलषति नात्मजायाभ्रातृगुणेष्वतीवादृतो
भवतीति॥ 21॥ 540

अतोऽर्हसि ममात्मीयं चरुं दातुं मदीयं चरुमात्मनोपयोक्तुम्॥ 22॥ 541

मत्पुत्रेण हि सकलभूमण्डलपरिपालनं कार्यं कियद्वा ब्राह्मणस्य
बलवीर्यसम्पदेत्युक्ता सा स्वचरुं मात्रे दत्तवती॥ 23॥ 542

अथ वनादागत्य सत्यवतीमृषिरपश्यत्॥ 24॥ 543

आह चैनामतिपापे किमिदमकार्यं भवत्या कृतमतिरौद्रं ते वपुर्लक्ष्यते ॥ 25 ॥ 544

नूनं त्वया त्वन्मातृसात्कृतश्चरुरुपयुक्तो न युक्तमेतत् ॥ 26 ॥ 545

मया हि तत्र चरौ सकलैश्वर्यवीर्यशौर्यबलसम्पदारोपिता
त्वदीयचरावप्यखिलशान्तिज्ञानतितिक्षादिब्राह्मणगुणसम्पत् ॥ 27 ॥ 546

तच्च विपरीतं कुर्वत्यास्तवातिरौद्रास्त्रधारणपालननिष्ठः क्षत्रियाचारः पुत्रो
भविष्यति तस्याश्चोपशमरुचिर्ब्राह्मणाचार इत्याकर्ण्यैव सा तस्य पादौ
जग्राह ॥ 28 ॥ 547

प्रणिपत्य चैनमाह ॥ 29 ॥ 548

भगवन्मयैतदज्ञानादनुष्ठितं प्रसादं मे कुरु मैवंविधः पुत्रो भवतु
काममेवंविधः पौत्रो भवत्वित्युक्ते मुनिरप्याह ॥ 30 ॥ 549

एवमस्त्वति ॥ 31 ॥ 550

अनन्तरं च सा जमदग्निमजीजनत् ॥ 32 ॥ 551

तन्माता च विश्वामित्रं जनयामास ॥ 33 ॥ 552

सत्यवत्यपि कौशिकी नाम नद्यभवत् ॥ 34 ॥ 553

जमदग्निरिक्ष्वाकुवंशोद्भवस्य रेणोस्तनयां रेणुकामुपयेमे ॥ 35 ॥ 554

तस्यां चाशेषक्षत्रहन्तारं परशुरामसंज्ञं
भगवतस्सकललोकगुरोर्नारायणस्यांशं जमदग्निरजीजनत् ॥ 36 ॥ 555

विश्वामित्रपुत्रस्तु भार्गव एव शुनश्शेपो देवैर्दत्तः ततश्च
देवरातनामाभवत् ॥ 37 ॥ 556

ततश्चान्ये मधुच्छन्दोधनञ्जयकृतदेवाष्टककच्छपहारीतकाख्या विश्वामित्रपुत्रा बभूवुः ॥ 38 ॥ 557

तेषां च बहूनि कौशिकगोत्राणि ऋष्यन्तरेषु विवाह्यान्यभवन् ॥ 39 ॥ 558

॥ इति श्रीविष्णुपुराणे चतुर्थेंऽशे सप्तमोऽध्यायः ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ चतुर्थेऽंशे अष्टमोऽध्यायः ॥

श्रीपराशर उवाच

पुरूरवसो ज्येष्ठः पुत्रो यस्त्वायुर्नामा स राहोर्दुहितरमुपयेमे ॥ 1 ॥ 559

तस्यां च पञ्च पुत्रानुत्पादयामास ॥ 2 ॥ 560

नहुषक्षत्रवृद्धरम्भरजिसंज्ञास्तथैवानेनाः पञ्चमः पुत्रोऽभूत् ॥ 3 ॥ 561

क्षत्रवृद्धात्सुहोत्रः पुत्रोऽभवत् ॥ 4 ॥ 562

काश्यकाशगृत्समदास्त्रयस्तस्य पुत्रा बभूवुः ॥ 5 ॥ 563

गृत्समदस्य शौनकश्चातुर्वर्ण्यप्रवर्तयिताभूत् ॥ 6 ॥ 564

काश्यस्य काशेयः काशिराजः तस्माद्राष्ट्रः राष्ट्रस्य दीर्घतपाः
पुत्रोऽभवत् ॥ 7 ॥ 565

धन्वन्तरिस्तु दीर्घतपसः पुत्रोऽभवत् ॥ 8 ॥ 566

स हि संसिद्धकार्यकरणस्सकलसम्भूतिष्वशेषज्ञानविद् भगवता नारायणेन
चातीतसम्भूतौ तस्मै वरो दत्तः ॥ 9 ॥ 567

काशिराजगोत्रेऽवतीर्य त्वमष्टधा सम्यगायुर्वेदं करिष्यसि
यज्ञभागभग्भविष्यसीति ॥ 10 ॥ 568

तस्य च धन्वन्तरेः पुत्रः केतुमान् केतुमतो भीमरथस्तस्यापि
दिवोदासस्तस्यापि प्रतर्दनः ॥ 11 ॥ 569

स च मद्रश्रेण्यवंशविनाशनादशेषशात्रवोऽनेन जिता इति शत्रुजिदभवत्॥ 12॥ 570

तेन च प्रीतिमतात्मपुत्रो वत्सवत्सेत्यभिहितो वत्सोऽभवत्॥ 13॥ 571

सत्यपरतया ऋतध्वजसंज्ञामवाप॥ 14॥ 572

ततश्च कुवलयनामानमश्वं लेभे ततः कुवलयाश्व इत्यस्यां पृथिव्यां प्रथितः॥ 15॥ 573

तस्य च वत्सस्य पुत्रोऽलर्कनामाभवद् यस्यायमद्यापि श्लोको गीयते॥ 16॥ 574

षष्टिवर्षसहस्राणि षष्टिवर्षशतानि च।
अलर्कादपरो नान्यो बुभुजे मेदिनीं युवा॥ 17॥ 575

तस्याप्यलर्कस्य सन्नतिनामाभवदात्मजः॥ 18॥ 576

सन्नतेः सुनीथस्तस्यापि सुकेतुस्तस्माच्च धर्मकेतुर्जज्ञे॥ 19॥ 577

ततश्च सत्यकेतुस्तस्माद्विभुस्तत्तनयस्सुविभुस्ततश्च सुकुमारस्तस्यापि धृष्टकेतुस्ततश्च वीतिहोत्रस्तस्माद्भार्गो भार्गस्य भार्गभूमिस्ततश्चातुर्वर्ण्यप्रवृत्तिरित्येते काश्यभूभृतः कथिताः॥ 20॥ 578

रजेस्तु सन्ततिः श्रूयताम्॥ 21॥ 579

॥ इति श्रीविष्णुपुराणे चतुर्थेंऽशे अष्टमोऽध्यायः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ चतुर्थेंऽशे नवमोऽध्यायः ॥

श्रीपराशर उवाच

रजेस्तु पञ्च पुत्रशतान्यतुलबलपराक्रमसाराण्यासन् ॥ 1 ॥ 580

देवासुरसंग्रामारम्भे च परस्परवधेप्सवो देवाश्चासुराश्च ब्रह्माणमुपेत्य पप्रच्छुः ॥ 2 ॥ 581

भगवन्नस्माकमत्र विरोधे कतरः पक्षो जेता भविष्यतीति ॥ 3 ॥ 582

अथाह भगवान् ॥ 4 ॥ 583

येषामर्थे रजिरात्तायुधो योत्स्यति तत्पक्षो जेतेति ॥ 5 ॥ 584

अथ दैत्यैरुपेत्य रजिरात्मसाहाय्यदानायाभ्यर्थितः प्राह ॥ 6 ॥ 585

योत्स्येऽहं भवतामर्थे यद्यहममरजयाद्भवतामिन्द्रो भविष्यामीत्याकर्ण्यैतत्तैरभिहितम् ॥ 7 ॥ 586

न वयमन्यथा वदिष्यामोऽन्यथा करिष्यामोऽस्माकमिन्द्रः प्रह्लादस्तदर्थमेवायमुद्यम इत्युक्त्वा गतेष्वसुरेषु देवैरप्यसाववनिपतिरेवमेवोक्तस्तेनापि च तथैवोक्ते देवैरिन्द्रस्त्वं भविष्यसीति समन्वीप्सितम् ॥ 8 ॥ 587

रजिनापि देवसैन्यसहायेनानेकैर्महास्त्रैस्तदशेषमहासुरबलं निषूदितम् ॥ 9 ॥ 588

अथ जितारिपक्षश्च देवेन्द्रो रजिचरणयुगलमात्मनः शिरसा निपीड्याह ॥ 10 ॥ 589

भयत्राणादन्नदानाद्भवानस्मत्पिताऽशेषलोकानामुत्तमोत्तमो भवान् यस्याहं पुत्रस्त्रिलोकेन्द्रः ॥ 11 ॥ 590

स चापि राजा प्रहस्याह ॥ 12 ॥ 591

एवमस्त्वेवमस्त्वनतिक्रमणीया हि वैरिपक्षादप्यनेकविधचाटुवाक्यगर्भा प्रणतिरित्युक्त्वा स्वपुरं जगाम ॥ 13 ॥ 592

शतक्रतुरपीन्द्रत्वं चकार ॥ 14 ॥ 593

स्वर्याते तु रजौ नारदर्षिचोदिता रजिपुत्राश्शशतक्रतुमात्मपितृपुत्रं समाचाराद्राज्यं याचितवन्तः ॥ 15 ॥ 594

अप्रदानेन च विजित्येन्द्रमतिबलिनः स्वयमिन्द्रत्वं चक्रुः ॥ 16 ॥ 595

ततश्च बहुतिथे काले ह्यतीते बृहस्पतिमेकान्ते दृष्ट्वा अपह्नतत्रैलोक्ययज्ञभागः शतक्रतुरुवाच ॥ 17 ॥ 596

बदरीफलमात्रमप्यर्हसि ममाप्यायनाय पुरोडाशखण्डं दातुमित्युक्तो बृहस्पतिरुवाच ॥ 18 ॥ 597

यद्येवं त्वयाहं पूर्वमेव चोदितस्स्यां तन्मया त्वदर्थं किमकर्त्तव्यमित्यल्पैरेवाहोभिस्त्वां निजं पदं प्रापयिष्यामीत्यभिधाय तेषामनुदिनमाभिचारिकं बुद्धिमोहाय शक्रस्य तेजोऽभिवृद्धये जुहाव ॥ 19 ॥ 598

ते चापि तेन बुद्धिमोहेनाभिभूयमाना ब्रह्मद्विषो धर्मत्यागिनो वेदवादपराङ्मुखा बभूवुः ॥ 20 ॥ 599

ततस्तानपेतधर्माचारानिन्द्रो जघान ॥ 21 ॥ 600

पुरोहिताप्यायिततेजाश्च शक्रो दिवमाक्रमत् ॥ 22 ॥ 601

एतदिन्द्रस्य स्वपदच्यवनादारोहणं श्रुत्वा पुरुषः स्वपदभ्रंशं दौरात्म्यं च नाप्नोति ॥ 23 ॥ 602

रम्भस्त्वनपत्योऽभवत् ॥ 24 ॥ 603

क्षत्रवृद्धसुतः प्रतिक्षत्रोऽभवत् ॥ 25 ॥ 604

तत्पुत्रः सञ्जयस्तस्यापि जयस्तस्यापि विजयस्तस्माच्च जज्ञे कृतः ॥ 26 ॥ 605

तस्य च हर्यधनो हर्यधनसुतस्सहदेवस्तस्माददीनस्तस्य जयत्सेनस्ततश्च संस्कृतिस्तत्पुत्रः क्षत्रधर्मा इत्येते क्षत्रवृद्धस्य वंश्याः ॥ 27 ॥ 606

ततो नहुषवंशं प्रवक्ष्यामि ॥ 28 ॥ 607

॥ इति श्रीविष्णुपुराणे चतुर्थेंऽशे नवमोऽध्यायः ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ चतुर्थेंऽशे दशमोऽध्यायः ॥

श्रीपराशर उवाच

यतिययातिसंयात्यायातिवियातिकृतिसंज्ञा नहुषस्य षट् पुत्रा महाबलपराक्रमा बभूवुः ॥ 1 ॥ 608

यतिस्तु राज्यं नैच्छत् ॥ 2 ॥ 609

ययातिस्तु भूभृदभवत् ॥ 3 ॥ 610

उशनसश्च दुहितरं देवयानीं वार्षपर्वणीं च शर्मिष्ठामुपयेमे ॥ 4 ॥ 611

अत्रानुवंशश्लोको भवति ॥ 5 ॥ 612

यदुं च तुर्वसुं चैव देवयानी व्यजायत।
द्रुह्युं चानुं च पूरुं च शर्मिष्ठा वार्षपर्वणी ॥ 6 ॥ 613

काव्यशापाच्चाकालेनैव ययातिर्जरामवाप ॥ 7 ॥ 614

प्रसन्नशुक्रवचनाच्च स्वजरां सङ्क्रामयितुं ज्येष्ठं पुत्रं यदुमुवाच ॥ 8 ॥ 615

वत्स त्वन्मातामहशापादियमकालेनैव जरा ममोपस्थिता तामहं तस्यैवानुग्रहाद्भवतस्सञ्चारयामि ॥ 9 ॥ 616

एकं वर्षसहस्रमतृप्तोऽस्मि विषयेषु त्वद्वयसा विषयानहं भोक्तुमिच्छामि ॥ 10 ॥ 617

नात्र भवता प्रत्याख्यानं कर्त्तव्यमित्युक्तस्स यदुनैच्छत्तां जरामादातुम् ॥ 11 ॥ 618

तं च पिता शशाप त्वत्प्रसूतिर्न राज्यार्हा भविष्यतीति ॥ 12 ॥ 619

अनन्तरं च तुर्वसुं द्रुह्युमनुं च पृथिवीपतिर्जराग्रहणार्थं स्वयौवनप्रदानाय चाभ्यर्थयामास ॥ 13 ॥ 620

तेरप्येकैकेन प्रत्याख्यातस्ताञ्छशाप ॥ 14 ॥ 621

अथ शर्मिष्ठातनयमशेषकनीयांसं पूरुं तथैवाह ॥ 15 ॥ 622

स चातिप्रवणमतिः सबहुमानं पितरं प्रणम्य महाप्रसादोऽयमस्माकमित्युदारमभिधाय जरां जग्राह ॥ 16 ॥ 623

स्वकीयं च यौवनं स्वपित्रे ददौ ॥ 17 ॥ 624

सोऽपि पौरवं यौवनमासाद्य धर्माविरोधेन यथाकामं यथाकालोपपन्नं यथोत्साहं विषयांश्चचार ॥ 18 ॥ 625

सम्यक् च प्रजापालनमकरोत् ॥ 19 ॥ 626

विश्वाच्या देवयान्या च सहोपभोगं भुक्त्वा कामानामन्तं प्राप्स्यामीत्यनुदिनं उन्मनस्को बभूव ॥ 20 ॥ 627

अनुदिनं चोपभोगतः कामानतिरम्यान्मेने ॥ 21 ॥ 628

ततश्चैवमगायत ॥ 22 ॥ 629

न जातु कामः कामानामुपभोगेन शाम्यति।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते ॥ 23 ॥ 630

यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः।
एकस्यापि न पर्याप्तं तस्मात्तृष्णां परित्यजेत् ॥ 24 ॥ 631

यदा न कुरुते भावं सर्वभूतेषु पापकम्।
समदृष्टेस्तदा पुंसः सर्वास्सुखमया दिशः॥ 25॥ 632

या दुस्त्यजा दुर्मतिभिर्या न जीर्यति जीर्यतः।
तां तृष्णां सन्त्यजेत्प्राज्ञस्सुखेनैवाभिपूर्यते॥ 26॥ 633

जीर्यन्ति जीर्यतः केशा दन्ता जीर्यन्ति जीर्यतः।
धनाशा जीविताशा च जीर्यतोऽपि न जीर्यतः॥ 27॥ 634

पूर्ण वर्षसहस्रं मे विषयासक्तचेतसः।
तथाप्यनुदिनं तृष्णा मम तेषूपजायते॥ 28॥ 635

तस्मादेतामहं त्यक्त्वा ब्रह्मण्याधाय मानसम्।
निर्द्वन्द्वो निर्ममो भूत्वा चरिष्यामि मृगैस्सह॥ 29॥ 636

श्रीपराशर उवाच

पूरोस्सकाशादादाय जरां दत्त्वा च यौवनम्।
राज्येऽभिषिच्य पूरुं च प्रययौ तपसे वनम्॥ 30॥ 637

दिशि दक्षिणपूर्वस्यां तुर्वसुं च समादिशत्।
प्रतीच्यां च तथा द्रुह्युं दक्षिणायां ततो यदुम्॥ 31॥ 638

उदीच्यां च तथैवानुं कृत्वा मण्डलिनो नृपान्।
सर्वपृथ्वीपतिं पूरुं सोऽभिषिच्य वनं ययौ॥ 32॥ 639

॥ इति श्रीविष्णुपुराणे चतुर्थेऽंशे दशमोऽध्यायः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ चतुर्थेंऽशे एकादशोऽध्यायः ॥

श्रीपराशर उवाच

अतः परं ययातेः प्रथमपुत्रस्य यदोर्वंशमहं कथयामि ॥ 1 ॥ 640

यत्राशेषलोकनिवासो
मनुष्यसिद्धगन्धर्वयक्षराक्षसगुह्यककिंपुरुषाप्सरउरगविहगदैत्यदानवा -
दित्यरुद्रवस्वश्विमरुद्देवर्षिभिर्मुमुक्षुभिर्धर्मार्थकाममोक्षार्थिभिश्च
तत्तत्फललाभाय सदाभिष्टुतोऽपरिच्छेद्यमाहात्म्यांशेन भगवाननादिनिधनो
विष्णुरवततार ॥ 2 ॥ 641

अत्र श्लोकः ॥ 3 ॥ 642

यदोर्वंशं नरः श्रुत्वा सर्वपापैः प्रमुच्यते।
यत्रावतीर्णं कृष्णाख्यं परं ब्रह्म निराकृति ॥ 4 ॥ 643

सहस्रजित्क्रोष्टुनलनहुषसंज्ञाश्चत्वारो यदुपुत्रा बभूवुः ॥ 5 ॥ 644

सहस्रजित्पुत्रशशतजित् ॥ 6 ॥ 645

तस्य हैहयहेहयवेणुहयास्त्रयः पुत्रा बभूवुः ॥ 7 ॥ 646

हैहयपुत्रो धर्मस्तस्यापि धर्मनेत्रस्ततः कुन्तिः कुन्तेः सहजित् ॥ 8 ॥ 647

तत्तनयो महिष्मान् योऽसौ माहिष्मतीं पुरीं निवासयामास ॥ 9 ॥ 648

तस्माद्भद्रश्रेण्यस्ततो दुर्दमस्तस्माद्धनको धनकस्य कृतवीर्यकृताग्नि
कृतधर्मकृतौजसश्चत्वारः पुत्रा बभूवुः ॥ 10 ॥ 649

कृतवीर्यादर्जुनस्सप्तद्वीपाधिपतिर्बाहुसहस्रो जज्ञे ॥ 11 ॥ 650

योऽसौ भगवदंशमत्रिकुलप्रसूतं दत्तात्रेयाख्यमाराध्य
बाहुसहस्रमधर्मसेवानिवारणं स्वधर्मसेवित्वं रणे पृथिवीजयं
धर्मतश्चानुपालनमरातिभ्योऽपराजयमखिलजगत्प्रख्यातपुरुषाद्य
मृत्युमित्येतान्वरानभिलषितवांल्लेभे च ॥ 12 ॥ 651

तेनेयमशेषद्वीपवती पृथिवी सम्यक्परिपालिता ॥ 13 ॥ 652

दशयज्ञसहस्राण्यसावयजत् ॥ 14 ॥ 653

तस्य च श्लोकोऽद्यापि गीयते ॥ 15 ॥ 654

न नूनं कार्तवीर्यस्य गतिं यास्यन्ति पार्थिवाः।
यज्ञैर्दानैस्तपोभिर्वा प्रश्रयेण श्रुतेन च ॥ 16 ॥ 655

अनष्टद्रव्यता च तस्य राज्येऽभवत् ॥ 17 ॥ 656

एवं च पञ्चाशीतिवर्षसहस्राण्यव्याहतारोग्यश्रीबलपराक्रमो
राज्यमकरोत् ॥ 18 ॥ 657

माहिष्मत्यां दिग्विजयाभ्यागतो
नर्मदाजलावगाहनक्रीडातिपानमदाकुलेनायत्नेनैव
तेनाशेषदेवदैत्यगन्धर्वेशजयोद्भूतमदावलेपोऽपि रावणः पशुरिव बद्ध्वा
स्वनगरैकान्ते स्थापितः ॥ 19 ॥ 658

यश्च पञ्चाशीतिवर्षसहस्रोपलक्षणकालावसाने भगवन्नारायणांशेन
परशुरामेणोपसंहृतः ॥ 20 ॥ 659

तस्य च पुत्रशतप्रधानाः पञ्च पुत्रा बभूवुः
शूरशूरसेनवृषसेनमधुजयध्वजसंज्ञाः ॥ 21 ॥ 660

जयध्वजात्तालजङ्घः पुत्रोऽभवत्॥ 22॥ 661

तालजङ्घस्य तालजङ्घाख्यं पुत्रशतमासीत्॥ 23॥ 662

एषां ज्येष्ठो वीतिहोत्रस्तथान्यो भरतः॥ 24॥ 663

भरतादवृषः॥ 25॥ 664

वृषस्य पुत्रो मधुरभवत्॥ 26॥ 665

तस्यापि वृष्णिप्रमुखं पुत्रशतमासीत्॥ 27॥ 666

यतो वृष्णिसंज्ञामेतद्गोत्रमवाप॥ 28॥ 667

मधुसंज्ञाहेतुश्च मधुरभवत्॥ 29॥ 668

यादवाश्च यदुनामोपलक्षणादिति॥ 30॥ 669

॥ इति श्रीविष्णुपुराणे चतुर्थेंऽशे एकादशोऽध्यायः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ चतुर्थेंऽशे द्वादशोऽध्यायः ॥

श्रीपराशर उवाच

क्रोष्टोस्तु यदुपुत्रस्यात्मजो ध्वजिनीवान् ॥ 1 ॥ 670

ततश्च स्वातिस्ततो रुशंकू रुशंकोश्चित्ररथः ॥ 2 ॥ 671

तत्तनयश्शशिबिन्दुश्चतुर्दशमहारत्नेशश्चक्रवर्त्यभवत् ॥ 3 ॥ 672

तस्य च शतसहस्रं पत्नीनामभवत् ॥ 4 ॥ 673

दशलक्षसंख्याश्च पुत्राः ॥ 5 ॥ 674

तेषां च पृथुश्रवाः पृथुकर्मा पृथुकीर्तिः पृथुयशाः पृथुजयः पृथुदानः षद् पुत्राः प्रधानाः ॥ 6 ॥ 675

पृथुश्रवसश्च पुत्रः पृथुतमः ॥ 7 ॥ 676

तस्मादुशना यो वाजिमेधानां शतमाजहार ॥ 8 ॥ 677

तस्य च शितपुर्नाम पुत्रोऽभवत् ॥ 9 ॥ 678

तस्यापि रुक्मकवचस्ततः परावृत् ॥ 10 ॥ 679

परावृतो रुक्मेषुपृथुन्यामघवलितहरितसंज्ञास्तस्य पञ्चात्मजा बभूवुः ॥ 11 ॥ 680

तस्यायमद्यापि ज्यामघस्य श्लोको गीयते ॥ 12 ॥ 681

भार्यावश्यास्तु ये केचिद्भविष्यन्त्यथ वा मृताः।
तेषां तु ज्यामघः श्रेष्ठश्शैव्यापतिरभून्नृपः॥ 13॥ 682

अपुत्रा तस्य सा पत्नी शैव्या नाम तथाप्यसौ।
अपत्यकामोऽपि भयान्नान्यां भार्यामविन्दत॥ 14॥ 683

स त्वेकदा प्रभूतरथतुरगगजसम्मर्दातिदारुणे महाहवे युद्ध्यमानः सकलमेवारिचक्रमजयत्॥ 15॥ 684

तच्चारिचक्रमपास्तपुत्रकलत्रबन्धुबलकोशं स्वमधिष्ठानं परित्यज्य दिशः प्रति विद्रुतम्॥ 16॥ 685

तस्मिंश्च विद्रुतेऽतित्रासलोलायतलोचनयुगलं त्राहि त्राहि मां तात‌ाम्ब भ्रातरित्याकुलविलापविधुरं स राजकन्यारत्नमद्राक्षीत्॥ 17॥ 686

तहद्दर्शनाच्च तस्यामनुरागानुगतान्तरात्मा स नृपोऽचिन्तयत्॥ 18॥ 687

साध्विदं ममापत्यरहितस्य वन्ध्याभर्तुः साम्प्रतं विधिनापत्यकारणं कन्यारत्नमुपपादितम्॥ 19॥ 688

तदेतत्समुद्वहामीति॥ 20॥ 689

अथवैनां स्यन्दनमारोप्य स्वमधिष्ठानं नयामि॥ 21॥ 690

तयैव देव्या शैव्ययाहमनुज्ञातस्समुद्वहामीति॥ 22॥ 691

अथैनां रथमारोप्य स्वनगरमगच्छत्॥ 23॥ 692

विजयिनं च राजानमशेषपौरभृत्यपरिजनामात्यसमेता शैव्या द्रष्टुमधिष्ठानद्वारमागता॥ 24॥ 693

सा चावलोक्य राज्ञः सव्यपार्श्ववर्त्तिनीं कन्यामीषदुद्भूतामर्षस्फुरदधरपल्लवा राजानमवोचत्॥ 25॥ 694

अतिचपलचित्तात्र स्यन्दने केयमारोपितेति ॥ 26 ॥ 695

असावप्यनालोचितोत्तरवचनोऽतिभयात्तामाह स्नुषा ममेयमिति ॥ 27 ॥ 696

अथैनं शैव्योवाच ॥ 28 ॥ 697

नाहं प्रसूता पुत्रेण नान्या पत्यभवत्तव।
स्नुषासम्बन्धता ह्येषा कतमेन सुतेन ते ॥ 29 ॥ 698

श्रीपराशर उवाच

इत्यात्मेर्ष्याकोपकलुषितवचनमुषितविवेको
भयादुरुक्तपरिहारार्थमिदमवनीपतिराह ॥ 30 ॥ 699

यस्ते जनिष्यत आत्मजस्तस्येयमनागतस्यैव भार्या
निरूपितेत्याकर्ण्योद्भूतमृदुहासा तथेत्याह ॥ 31 ॥ 700

प्रविवेश च राज्ञा सहाधिष्ठानम् ॥ 32 ॥ 701

अनन्तरं चातिशुद्धलग्नहोरांशकावयवोक्तकृतपुत्रजन्मलाभगुणाद्वयसः
परिणाममुपगतापि शैव्या स्वल्पैरेवाहोभिर्गर्भमवाप ॥ 33 ॥ 702

कालेन च कुमारमजीजनत् ॥ 34 ॥ 703

तस्य च विदर्भ इति पिता नाम चक्रे ॥ 35 ॥ 704

स च तां स्नुषामुपयेमे ॥ 36 ॥ 705

तस्यां चासौ क्रथकैशिकसंज्ञौ पुत्रावजनयत् ॥ 37 ॥ 706

पुनश्च तृतीयं रोमपादसंज्ञं पुत्रमजीजनद्यो नारदादवाप्तज्ञानवानभवत् ॥ 38 ॥ 707

रोमपादाद्बभ्रुर्बभ्रोर्धृतिर्धृतेः कैशिकः कैशिकस्यापि चेदिः पुत्रोऽभवद् यस्य
सन्ततौ चैद्या भूपालाः ॥ 39 ॥ 708

क्रथस्य स्नुषापुत्रस्य कुन्तिरभवत्॥ 40॥ 709

कुन्तेर्धृष्टिर्धृष्टेर्निधृतिर्निधृतेर्दशार्हस्ततश्च व्योमा तस्यापि जीमूतस्ततश्च विकृतिस्ततश्च भीमरथः तस्मान्नवरथस्तस्यापि दशरथस्ततश्च शकुनिः तत्तनयः करम्भिः करम्भेर्देवरातोऽभवत्॥ 41॥ 710

तस्माद्देवक्षत्रस्तस्यापि मधुर्मधोः कुमारवंशः कुमारवंशादनुरनोः पुरुमित्रःपृथिवीपतिरभवत्॥ 42॥ 711

ततश्चांशुस्तस्माच्च सत्वतः॥ 43॥ 712

सत्वतादेते सात्वताः॥ 44॥ 713

इत्येतां ज्यामघस्य सन्ततिं सम्यक् श्रद्धासमन्वितः श्रुत्वा पुमान् मैत्रेय प्रमुच्यते पातकैः॥ 45॥ 714

॥ इति श्रीविष्णुपुराणे चतुर्थेंऽशे द्वादशोऽध्यायः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ चतुर्थेंऽशे त्रयोदशोऽध्यायः ॥

श्रीपराशर उवाच

भजनभजमानदिव्यान्धकदेवावृधमहाभोजवृष्णिसंज्ञास्सत्वतस्य पुत्रा बभूवुः ॥ 1 ॥ 715

भजमानस्य निमिकृकणवृष्णयस्तथान्ये द्वैमात्राः शतजित्सहस्रजिदयुतजित्संज्ञास्त्रयः ॥ 2 ॥ 716

देवावृधस्यापि बभ्रुः पुत्रोऽभवत् ॥ 3 ॥ 717

तयोश्चायं श्लोको गीयते ॥ 4 ॥ 718

यथैव शृणुमो दूरात्सम्पश्यामस्तथान्तिकात्।
बभ्रुः श्रेष्ठो मनुष्याणां देवैर्देवावृधस्समः ॥ 5 ॥ 719

पुरुषाः षट् च षष्टिश्च षट् सहस्राणि चाष्ट च।
तेऽमृतत्वमनुप्राप्ता बभ्रोर्देवावृधादपि ॥ 6 ॥ 720

महाभोजस्त्वतिधर्मात्मा तस्यान्वये भोजा मृत्तिकावरपुरनिवासिनो मार्त्तिकावरा बभूवुः ॥ 7 ॥ 721

वृष्णेः सुमित्रो युधाजिच्च पुत्रावभूताम् ॥ 8 ॥ 722

ततश्चानमित्रस्तथानमित्रान्निघ्नः ॥ 9 ॥ 723

निघ्नस्य प्रसेनसत्राजितौ ॥ 10 ॥ 724

तस्य च सत्राजितो भगवानादित्यः सखाभवत्॥ 11॥ 725

एकदा त्वम्भोनिधितीरसंश्रयः सूर्यं सत्राजित्तुष्टाव तन्मनस्कतया च भास्वानभिष्टूयमानोऽग्रतस्तस्थौ॥ 12॥ 726

ततस्त्वस्पष्ट मूर्त्तिधरं चैनमालोक्य सत्राजित्सूर्यमाह॥ 13॥ 727

यथैव व्योम्नि वह्निपिण्डोपमं त्वामहमपश्यं तथैवाद्याग्रतो गतमप्यत्र भगवता किञ्चिन्न प्रसादीकृतं विशेषमुपलक्षयामीत्येवमुक्ते भगवता सूर्येण निजकण्ठादुन्मुच्य स्यमन्तकं नाम महामणिवरमवतार्यैकान्ते न्यस्तम्॥ 14॥ 728

ततस्तमाताग्रोज्ज्वलं ह्रस्ववपुषमीषदापिंगलनयनमादित्यमद्राक्षीत्॥ 15॥ 729

कृतप्रणिपातस्तवादिकं च सत्राजितमाह भगवानादित्यस्सहस्रदीधितिर्वरमस्मत्तोऽभिमतं वृणीष्वेति॥ 16॥ 730

स च तदेव मणिरत्नमयाचत॥ 17॥ 731

स चापि तस्मै तद्दत्त्वा दीधितिपतिर्विवयति स्वधिष्ण्यमारुरोह॥ 18॥ 732

सत्राजिदप्यमलमणिरत्नसनाथकण्ठतया सूर्य इव तेजोभिरशेषदिगन्तराण्युद्भासयन् द्वारकां विवेश॥ 19॥ 733

द्वारकावासी जनस्तु तमायान्तमवेक्ष्य भगवन्तमादिपुरुषं पुरुषोत्तममवनिभारावतरणायांशेन मानुषरूपधारिणं प्रणिपत्याह॥ 20॥ 734

भगवन् भवन्तं द्रष्टुं नूनमयमादित्य आयातीत्युक्तो भगवानुवाच॥ 21॥ 735

भगवान्नायमादित्यः सत्राजिदयमादित्यदत्तस्यमन्तकाख्यं महामणिरत्नं बिभ्रदत्रोपयाति॥ 22॥ 736

तदेनं विश्रब्धाः पश्यतेत्युक्तास्ते तथैव ददृशुः॥ 23॥ 737

स च तं स्यमन्तकमणिमात्मनिवेशने चक्रे ॥ 24 ॥ 738

प्रतिदिनं तन्मणिरत्नममष्टो कनकभारान्स्रवति ॥ 25 ॥ 739

तत्प्रभावाच्च सकलस्यैव राष्ट्स्योपसर्णानावृष्टिव्यालाग्निचोरदुर्भिक्षादिभयं न भवति ॥ 26 ॥ 740

अच्युतोऽपि तद्दिव्यं रत्नमुग्रसेनस्य भूपतेर्योग्यमेतदिति लिप्सां चक्रे ॥ 27 ॥ 741

गोत्रभेदभयाच्छक्तोऽपि न जहार ॥ 28 ॥ 742

सत्राजिदप्यच्युतो मामेतद्याचयिष्यतीत्यवगम्य रत्नलोभादभ्रात्रे प्रसेनाय तद्रत्नमदात् ॥ 29 ॥ 743

तच्च शुचिना ध्रियमाणमशेषमेव सुवर्णस्रवादिकं गुणजातमुत्पादयति अन्यथा धारयन्तमेव हन्तीत्यजानन्नसावपि प्रसेनस्तेन कण्ठसक्तेन स्यमन्तकेनाश्वमारुह्याटव्यां मृगयामगच्छत् ॥ 30 ॥ 744

तत्र च सिंहाद्धधमवाप ॥ 31 ॥ 745

साश्वं च तं निहत्य सिंहोऽप्यमलमणिरत्नमास्याग्रेणादाय गन्तुमभ्युद्यतः ऋक्षाधिपतिना जाम्बवता दृष्टो घातितश्च ॥ 32 ॥ 746

जाम्बवानप्यमलमणिरत्नमादाय स्वबिले प्रविवेश ॥ 33 ॥ 747

सुकुमारसंज्ञाय बालकाय च क्रीडनकमकरोत् ॥ 34 ॥ 748

अनागच्छति तस्मिन्प्रसेने कृष्णो मणिरत्नमभिलषितवान्स च प्राप्तवान्नूनमेतदस्य कर्मेत्यखिल एव यदुलोकः परस्परं कर्णाकर्ण्यकथयत् ॥ 35 ॥ 749

विदितलोकापवादवृत्तान्तश्च भगवान् सर्वयदुसैन्यपरिवारपरिवृतः प्रसेनाश्वपदवीमनुससार ॥ 36 ॥ 750

ददर्श चाश्वसमवेतं प्रसेनं सिंहेन विनिहतम्॥ 37॥ 751

अखिलजनमध्ये सिंहपददर्शनकृतपरिशुद्धः सिंहपदमनुससार॥ 38॥ 752

ऋक्षपतिनिहतं च सिंहमप्यल्पे भूमिभागे दृष्ट्वा ततश्च तद्रत्नगौरवादृक्षस्यापि पदान्यनुययौ॥ 39॥ 753

गिरितटे च सकलमेव तद्यदुसैन्यमवस्थाप्य तत्पदानुसारी ऋक्षबिलं प्रविवेश॥ 40॥ 754

अन्तःप्रविष्टश्च धात्र्याः सुकुमारकमुल्लालयन्त्या वाणीं शुश्राव॥ 41॥ 755

सिंहः प्रसेनमवधीत्सिंहो जाम्बवता हतः।
सुकुमारक मा रोदीस्तव ह्येष स्यमन्तकः॥ 42॥ 756

इत्याकर्ण्योपलब्धस्यमन्तकोऽन्तःप्रविष्टः कुमारक्रीडनकीकृतं च धात्र्या हस्ते तेजोभिर्जाज्वल्यमानं स्यमन्तकं ददर्श॥ 43॥ 757

तं च स्यमन्तकाभिलषितचक्षुषमपूर्वपुरुषमागतं समवेक्ष्य धात्री त्राहि त्राहीति व्याजहार॥ 44॥ 758

तदार्त्तरवश्रवणानन्तरं चामर्षपूर्णहृदयः स जाम्बवानाजगाम॥ 45॥ 759

तयोश्च परस्परमुद्धतामर्षयोर्युद्धमेकविंशतिदिनान्यभवत्॥ 46॥ 760

ते च यदुसैनिकास्तत्र सप्ताष्टदिनानि तन्निष्क्रान्तिमुदीक्षमाणास्तस्थुः॥ 47॥ 761

अनिष्क्रमणे च मधुरिपुरसाववश्यमत्र बिलेऽत्यन्तं नाशमवाप्तो भविष्यत्यन्यथा तस्य जीवतः कथमेतावन्ति दिनानि शत्रुजये व्याक्षेपो भविष्यतीति कृताध्यवसाया द्वारकामागम्य हतः कृष्ण इति कथयामासुः॥ 48॥ 762

तद्बान्धवाश्च तत्कालोचितमखिलमुत्तरक्रियाकलापं चक्रुः॥ 49॥ 763

ततश्चास्य युद्धयमानस्यातिश्रद्धादत्तविशिष्टोपपात्रयुक्तान्नतोयादिना
श्रीकृष्णस्य बलप्राणपुष्टिरभूत्॥ 50॥ 764

इतरस्यानुदिनमतिगुरुपुरुषभेद्यमानस्य
अतिनिष्ठुरप्रहारपातपीडिताखिलावयवस्य निराहारतया
बलहानिरभूत्॥ 51॥ 765

निर्जितश्च भगवता जाम्बवान्प्रणिपत्य व्याजहार॥ 52॥ 766

सुरासुरगन्धर्वयक्षराक्षसादिभिरप्यखिलैर्भवान्न जेतुं शक्यः
किमुतावनिगोचरैरल्पवीर्यैर्नरैर्नरावयवभूतैश्च तिर्यग्योन्यनुसृतिभिः किं
पुनरस्मद्विधैरवश्यं भवताऽस्मत्स्वामिना रामेणेव नारायणस्य
सकलजगत्परायणस्यांशेन भगवता भवितव्यमित्युक्तस्तस्मै
भगवानखिलावनिभारावतरणार्थमवतरणमाचचक्षे॥ 53॥ 767

प्रीत्यभिव्यञ्जितकरतलस्पर्शनेन चैनमपगतयुद्धखेदं चकार॥ 54॥ 768

स च प्रणिपत्य पुनरप्येनं प्रसाद्य जाम्बवतीं नाम कन्यां गृहागतायार्घ्यभूतां
ग्राहयामास॥ 55॥ 769

स्यमन्तकमणिरत्नममपि प्रणिपत्य तस्मै प्रददौ॥ 56॥ 770

अच्युतोऽप्यतिप्रणतात्तस्मादग्राह्यमपि तन्मणिरत्नमात्मसंशोधनाय
जग्राह॥ 57॥ 771

सह जाम्बवत्या स द्वारकामाजगाम॥ 58॥ 772

भगवदागमनोद्भूतहर्षोत्कर्षस्य द्वारकावासिजनस्य
कृष्णावलोकनात्तत्क्षणमेवातिपरिणतवयसोऽपि
नवयौवनमिवाभवत्॥ 59॥ 773

दिष्ट्यादिष्ट्येति सकलयादवाः स्त्रियश्च सभाजयामासुः॥ 60॥ 774

भगवानपि यथानुभूतमशेषं यादवसमाजे यथावदाचचक्षे ॥ 61 ॥ 775

स्यमन्तकं च सत्राजिते दत्त्वा मिथ्याभिशस्तिपरिशुद्धिमवाप ॥ 62 ॥ 776

जाम्बवतीं चान्तःपुरे निवेशयामास ॥ 63 ॥ 777

सत्राजिदपि मयास्याभूतमलिनमारोपितमिति जातसन्त्रासात्स्वसुतां सत्यभामां भगवते भार्यार्थं ददौ ॥ 64 ॥ 778

तां चाक्रूरकृतवर्मशतधन्वप्रमुखा यादवाः प्राग्वरयाम्बभूवुः ॥ 65 ॥ 779

ततस्तत्प्रदानादवज्ञातमेवात्मानं मन्यमानाः सत्राजिति वैरानुबन्धं चक्रुः ॥ 66 ॥ 780

अक्रूरकृतवर्मप्रमुखाश्च शतधन्वानमूचुः ॥ 67 ॥ 781

अयमतीव दुरात्मा सत्राजिद् योऽस्माभिर्भवता च प्रार्थितोऽप्यात्मजामस्मान् भवन्तं चाविगणय्य कृष्णाय दत्तवान् ॥ 68 ॥ 782

तदलमनेन जीवता घातयित्वैनं तन्महारत्नं स्यमन्तकाख्यं त्वया किं न गृह्यते वयमभ्युपपत्स्यामो यद्यच्युतस्तवोपरि वैरानुबन्धं करिष्यतीत्येवमुक्तस्तथेत्यसावप्याह ॥ 69 ॥ 783

जतुगृहदग्धानां पाण्डुतनयानां विदितपरमार्थोऽपि भगवान् दुर्योधनप्रयत्नशैथिल्यकरणार्थं कुल्यकरणाय वारणावतं गतः ॥ 70 ॥ 784

गते च तस्मिन् सुप्तमेव सत्राजितं शतधन्वा जघान मणिरत्नं चाददात् ॥ 71 ॥ 785

पितृवधामर्षपूर्णा च सत्यभामा शीघ्रं स्यन्दनमारूढा वारणावतं गत्वा भगवतेऽहं प्रतिपादितेत्यक्षान्तिमता शतधन्वनास्मत्पिता व्यापादितस्तच्च स्यमन्तकमणिरत्नमपहृतं यस्यावभासनेनापहततिमिरं त्रैलोक्यं भविष्यति ॥ 72 ॥ 786

तदियं त्वदीयापहासना तदालोच्य यदत्र युक्तं तत्क्रियतामिति कृष्णमाह ॥ 73 ॥ 787

तया चैवमुक्तः परितुष्टान्तःकरणोऽपि कृष्णः सत्यभामाममर्षताम्रनयनः प्राह ॥ 74 ॥ 788

सत्ये सत्यं ममैवैषापहासना नाहमेतां तस्य दुरात्मनस्सहिष्ये ॥ 75 ॥ 789

न ह्यनुल्लंघ्य वरपादपं तत्कृतनीडाश्रयिणो विहङ्गमा वध्यन्ते तदलममुनास्मत्पुरतः शोकप्रेरितवाक्यपरिकरेणेत्युक्त्वा द्वारकामभ्येत्येकान्ते बलदेवं वासुदेवः प्राह ॥ 76 ॥ 790

मृगयागतं प्रसेनमटव्यां मृगपतिर्जघान ॥ 77 ॥ 791

सत्राजिदप्यधुना शतधन्वना निधनं प्रापितः ॥ 78 ॥ 792

तदुभयविनाशात्तन्मणिरत्नमावाभ्यां सामान्यं भविष्यति ॥ 79 ॥ 793

तदुत्तिष्ठारुह्यतां रथः शतधन्वनिधनायोद्यमं कुर्वित्यभिहितस्तथेति समन्वीप्सितवान् ॥ 80 ॥ 794

कृतोद्यमौ च तावुभावुपलभ्य शतधन्वा कृतवर्माणमुपेत्य पार्ष्णिपूरणकर्मनिमित्तमचोदयत ॥ 81 ॥ 795

आह चैनं कृतवर्मा ॥ 82 ॥ 796

नाहं बलदेववासुदेवाभ्यां सह विरोधायालमित्युक्तश्चाक्रूरमचोदयत् ॥ 83 ॥ 797

असावप्याह ॥ 84 ॥ 798

न हि कश्चिद्भगवता पादप्रहारपरिकम्पितजगत्त्रयेण सुररिपुवनितावेधव्यकारिणा प्रबलरिपुचक्राप्रतिहतचक्रेण चक्रिणा मदमुदितनयनावलोकिताखिलनिशातनेनातिगुरुवैरिवारणापकर्षणा -

विकृतमहिमोरुसीरेण सीरिणा च सह
सकलजगद्वन्द्यानाममरवराणामपि योद्धुं समर्थः किमुताहम् ॥ **85** ॥ 799

तदन्यश्शरणमभिलष्यतामित्युक्तश्शतधनुराह ॥ **86** ॥ 800

यद्यस्मत्परित्राणासमर्थं भवानात्मानमधिगच्छति तदयमस्मत्तस्तावन्मणिः
संगृह्य रक्ष्यतामिति ॥ **87** ॥ 801

एवमुक्तः सोऽप्याह ॥ **88** ॥ 802

यद्यन्त्यायामप्यवस्थायां न कस्मैचिद्भवान् कथयिष्यति तदहमेतं
ग्रहीष्यामीति ॥ **89** ॥ 803

तथेत्युक्ते चाक्रूरस्तन्मणिरत्नं जग्राह ॥ **90** ॥ 804

शतधनुरप्यतुलवेगां शतयोजनवाहिनीं बडवामारुह्यापक्रान्तः ॥ **91** ॥ 805

शैव्यसुग्रीवमेघपुष्पबलाहकाश्चचतुष्टययुक्तरथस्थितौ बलदेववासुदेवौ
तमनुप्रयातौ ॥ **92** ॥ 806

सा च बडवा शतयोजनप्रमाणमार्गमतीता पुनरपि वाह्यमाना
मिथिलावनोद्देशे प्राणानुत्ससर्ज ॥ **93** ॥ 807

शतधनुरपि तां परित्यज्य पदातिरेवाद्रवत् ॥ **94** ॥ 808

कृष्णोऽपि बलभद्रमाह ॥ **95** ॥ 809

तावदत्र स्यन्दने भवता स्थेयमहमेनमधमाचारं पदातिरेव पदातिमनुगम्य
यावद्घातयामि अत्र हि भूभागे दृष्टदोषास्सभया अतो नैतेऽश्वा भवतेमं
भूमिभागमुल्लङ्घनीयाः ॥ **96** ॥ 810

तथेत्युक्त्वा बलदेवो रथ एव तस्थौ ॥ **97** ॥ 811

कृष्णोऽपि द्विक्रोशमात्रं भूमिभागमनुसृत्य दूरस्थितस्यैव चक्रं क्षिप्त्वा शतधनुषश्शिरश्चिच्छेद ॥ **98** ॥ 812

तच्छरीराम्बरादिषु च बहुप्रकारमन्विच्छन्नपि स्यमन्तकमणिं नावाप यदा तदोपगम्य बलभद्रमाह ॥ **99** ॥ 813

वृथैवास्माभिः शतधनुर्घातितो न प्राप्तमखिलजगत्सारभूतं तन्महारत्नं स्यमन्तकाख्यमित्याकर्ण्योद्धूतकोपो बलदेवो वासुदेवमाह ॥ **100** ॥ 814

धिक्त्वां यस्त्वमेवमर्थलिप्सुरेतच्च ते भ्रातृत्वान्मया क्षान्तं तदयं पन्थास्स्वेच्छ्या गम्यतां न मे द्वारकया न त्वया न चाशेषबन्धुभिः कार्यमलमलमेभिर्ममाग्रतोऽलीकशपथैरित्याक्षिप्य तत्कथां कथञ्चित्प्रसाद्यमानोऽपि न तस्थौ ॥ **101** ॥ 815

स विदेहपुरीं प्रविवेश ॥ **102** ॥ 816

जनकराजश्चार्घ्यपूर्वकमेनं गृहं प्रवेशयामास ॥ **103** ॥ 817

स तत्रैव च तस्थौ ॥ **104** ॥ 818

वासुदेवोऽपि द्वारकामाजगाम ॥ **105** ॥ 819

यावच्च जनकराजगृहे बलभद्रोऽवतस्थे तावद्धार्त्तराष्ट्रो दुर्योधनस्तत्सकाशाद्गदाशिक्षामशिक्षयत् ॥ **106** ॥ 820

वर्षत्रयान्ते च बभ्रूग्रसेनप्रभृतिभिर्यादवैर्न तद्रत्नं कृष्णेनापहृतमिति कृतावगतिर्विदेहनगरीं गत्वा बलदेवस्सम्प्रत्याय्य द्वारकामानीतः ॥ **107** ॥ 821

अक्रूरोऽप्युत्तममणिसमुद्भूतसुवर्णेन भगवदध्यानपरोऽनवरतं यज्ञानियाज ॥ **108** ॥ 822

सवनगतौ हि क्षत्रियवैश्यौ निघ्नन्ब्रह्महा भवतीत्येवम्प्रकारं दीक्षाकवचं प्रविष्ट एव तस्थौ ॥ 109 ॥ 823

द्विषष्टिवर्षाण्येवं तन्मणिप्रभावात्तत्रोपसर्गदुर्भक्षमारिकामरणादिकं नाभूत् ॥ 110 ॥ 824

अथाक्रूरपक्षीयैर्भोजैश्शत्रुघ्ने सात्वतस्य प्रपौत्रे व्यापादिते भोजैस्सहाक्रो द्वारकामपहायापक्रान्तः ॥ 111 ॥ 825

तदपक्रान्तिदिनादारभ्य तत्रोपसर्गदुर्भिक्षव्यालानावृष्टिमारिकाद्युपद्रवा बभूवुः ॥ 112 ॥ 826

अथ यादवबलभद्रोग्रसेनसमवेतो मन्त्रममन्त्रयद् भगवानुरगारिकेतनः ॥ 113 ॥ 827

किमिदमेकदैव प्रचुरोपद्रवागमनमेतदालोच्यतामित्युक्तेऽन्धकनामा यदुवृद्धः प्राह ॥ 114 ॥ 828

अस्याक्रूरस्य पिता श्वफल्को यत्र यत्राभूत्तत्र तत्र दुर्भिक्षमारिकानावृष्ट्यादिकं नाभूत् ॥ 115 ॥ 829

काशिराजस्य विषये त्वनावृष्ट्या च श्वफल्को नीतः ततश्च तत्क्षणाहदेवो ववर्ष ॥ 116 ॥ 830

काशिराजपत्न्याश्च गर्भे कन्यारत्नं पूर्वमासीत् ॥ 117 ॥ 831

सा च कन्या पूर्णेऽपि प्रसूतिकाले नैव निश्चक्राम ॥ 118 ॥ 832

एवं च तस्य गर्भस्य द्वादशवर्षाण्यनिष्क्रामतो ययुः ॥ 119 ॥ 833

काशिराजश्च तामात्मजां गर्भस्थामाह ॥ 120 ॥ 834

पुत्रि कस्मान्न जायसे निष्क्रम्यतामास्यं ते द्रष्टुमिच्छामि एतां च मातरं
किमिति चिरं क्लेशयसीत्युक्ता गर्भस्थैव व्याजहार ॥ 121 ॥ 835

तात यद्येकैकां गां दिने दिने ब्राह्मणाय प्रयच्छसि
तदाहमन्यैस्त्रिभिर्वर्षैरस्माद्गर्भात्तावदवश्यं निष्क्रमिष्यामीत्येतद्वचनमाकर्ण्य
राजा दिने दिने ब्राह्मणाय गां प्रादात् ॥ 122 ॥ 836

सापि तावता कालेन जाता ॥ 123 ॥ 837

ततस्तस्याः पिता गान्दिनीति नाम चकार ॥ 124 ॥ 838

तां च गान्दिनीं कन्यां श्वफल्कायोपकारिणे गृहमागतायार्घ्यभूतां
प्रादात् ॥ 125 ॥ 839

तस्यामयमक्रूरः श्वफल्काज्जज्ञे ॥ 126 ॥ 840

तस्यैवंगुणमिथुनादुत्पत्तिः ॥ 127 ॥ 841

तत्कथमस्मिन्नपक्रान्तेऽत्र दुर्भिक्षमारिकाद्युपद्रवा न भविष्यन्ति ॥ 128 ॥ 842

तदयमत्रानीयतामलमतिगुणवत्यपराधान्वेषणेनेति
यदुवृद्धस्यान्धकस्यैतद्वचनमाकर्ण्य केशवोग्रसेनबलभद्रपुरोगमैर्यदुभिः
कृतापराधतितिक्षुभिरभयं दत्त्वा श्वफल्कगपुत्रः स्वपुरमानीतः ॥ 129 ॥ 843

तत्र चागतमात्र एव तस्य स्यमन्तकमणेः
प्रभावादनावृष्टिमारिकादुर्भिक्षव्यालाद्युपद्रवोपशमा बभूवुः ॥ 130 ॥ 844

कृष्णश्चिन्तयामास ॥ 131 ॥ 845

स्वल्पमेतत्कारणं यदयं गान्दिन्यां श्वफल्केनाक्रूरो जनितः ॥ 132 ॥ 846

सुमहांश्चायमनावृष्टिदुर्भिक्षमारिकाद्युपद्रवप्रतिषेधकारी प्रभावः ॥ 133 ॥ 847

तन्नूनमस्य सकाशे स मह्यमणिः स्यमन्तकाख्यस्तिष्ठति ॥ 134 ॥ 848

तस्य ह्येवंविधा प्रभावाः श्रयन्ते ॥ 135 ॥ 849

अयमपि च यज्ञादनन्तरमन्यत्क्र त्वन्तरं तस्यानन्तरमन्यद्यज्ञान्तरं
चाजस्रमविच्छिन्नं यजतीति ॥ 136 ॥ 850

अल्पोपादानं चास्यासंशयमत्रासौ मणिवरस्तिष्ठतीति
कृताध्यवसायोऽन्यत्प्रयोजनमुद्दिश्य सकलयादवसमाजमात्मगृह
एवाचीकरत् ॥ 137 ॥ 851

तत्र चोपविष्टेष्वखिलेषु यदुषु पूर्वं प्रयोजनमुपन्यस्य पर्यवसित च तस्मिन्
प्रसंगान्तरपरिहासकथामक्रूरेण कृत्वा जनार्दनस्तमक्रूरमाह ॥ 138 ॥ 852

दानपते जानीम एव वयं यथा शतधन्वना तदिदमखिलजगत्सारभूतं
स्यमन्तकं रत्नं भवतः समर्पितं तदशेषराष्ट्रोपकारकं भवत्सकाशे तिष्ठति
तिष्ठतु सर्व एव वयं तत्प्रभावफलभुजः किं त्वेष
बलभद्रोऽस्मानाशङ्कितवांस्तदस्मत्प्रीतये दर्शयस्वेत्यभिधाय जोषं स्थिते
भगवति वासुदेवे सरत्नस्सोऽचिन्तयत् ॥ 139 ॥ 853

किमत्रानुष्ठेयमन्यथा चेद् ब्रवीम्यहं तत्केवलाम्बरतिरोधानमन्विष्यन्तो
रत्नमेते द्रक्ष्यन्ति अतिविरोधो न क्षेम इति सञ्चिन्त्य
तमखिलजगत्कारणभूतं नारायणमाहाक्रूरः ॥ 140 ॥ 854

भगवन्ममैतत्स्यमन्तकरत्नं शतधनुषा समर्पितमपगते च तस्मिन्नद्य श्वः
परश्वो वा भगवान् याचयिष्यतीति कृतमतिरतिकृच्छ्रेणेतावन्तं
कालमधारयम् ॥ 141 ॥ 855

तस्य च धारणक्लेशेनाहमशेषोपभोगेष्वसङ्गिमानसो न वेद्मि
स्वसुखकलामपि ॥ 142 ॥ 856

एतावन्मात्रमप्यशेषराष्ट्रोपकारि धारयितुं न शक्नोति भवान्मन्यत इत्यात्मना न चोदितवान्॥ **143**॥ 857

तदिदं स्यमन्तकरत्नं गृह्यतामिच्छया यस्याभिमतं तस्य समर्प्यताम्॥ **144**॥ 858

ततः स्वोदरवस्त्रनिगोपितमतिलघुकनकसमुद्गकगतं प्रकटीकृतवान्॥ **145**॥ 859

ततश्च निष्क्राम्य स्यमन्तकमणिं तस्मिन्यदुकुलसमाजे मुमोच॥ **146**॥ 860

मुक्तमात्रे च तस्मिन्नतिकान्त्या तदखिलमास्थानमुद्द्योतितम्॥ **147**॥ 861

अथाहाक्रूरः स एष मणिः शतधन्वनास्माकं समर्पितः यस्यायं स एनं गृह्णातु इति॥ **148**॥ 862

तमालोक्य सर्वयादवानां साधुसाध्विति विस्मितमनसां वाचोऽश्रूयन्त॥ **149**॥ 863

तमालोक्यातीव बलभद्रो ममायमच्युतेनैव सामान्यस्समन्वीप्सित इति कृतस्पृहोऽभूत्॥ **150**॥ 864

ममैवायं पितृधनमित्यतीव च सत्यभामापि स्पृहयाञ्चकार॥ **151**॥ 865

बलसत्यावलोकनात्कृष्णोऽप्यात्मानं गोचक्रान्तरावस्थितमिव मेने॥ **152**॥ 866

सकलयादवसमक्षं चाक्रूरमाह॥ **153**॥ 867

एतद्धि मणिरत्नमात्मसंशोधनाय एतेषां यदूनां मया दर्शितम् एतच्च मम बलभद्रस्य च सामान्यं पितृधनं चैतत्सत्यभामाया नान्यस्यैतत्॥ **154**॥ 868

एतच्च सर्वकालं शुचिना ब्रह्मचर्यादिगुणवता ध्रियमाणमशेषराष्ट्रस्योपकारकमशुचिना ध्रियमाणमाधारमेव हन्ति॥ **155**॥ 869

अतोऽहमस्य षोडशस्त्रीसहस्रपरिग्रहादसमर्थो धारणे कथमेतत्सत्यभामा स्वीकरोति ॥ **156** ॥ 870

आर्यबलभद्रेणापि मदिरापानाद्यशेषोपभोगपरित्यागः कार्यः ॥ **157** ॥ 871

तदलं यदुलोकोऽयं बलभद्रः अहं च सत्या च त्वां दानपते प्रार्थयामः ॥ **158** ॥ 872

तद्भवानेव धारयितुं समर्थः ॥ **159** ॥ 873

त्वदधृतं चास्य राष्ट्रस्योपकारकं
तद्भवानशेषराष्ट्रनिमित्तमेतत्पूर्ववद्धारयत्वन्यन्न वक्तव्यमित्युक्तो
दानपतिस्तथेत्याह जग्राह च तन्महारत्नम् ॥ **160** ॥ 874

ततः प्रभृत्यक्रूरः प्रकटेनैव तेनातिजाज्वल्यमानेनात्मकण्ठावसक्तेनादित्य इवांशुमाली चचार ॥ **161** ॥ 875

इत्येतद्भगवतो मिथ्याभिशस्तिक्षालनं यः स्मरति न तस्य कदाचिदल्पापि मिथ्याभिशस्तिवति
अव्याहताखिलेन्द्रियरचाखिलपापमोक्षमवाप्नोति ॥ **162** ॥ 876

॥ इति श्रीविष्णुपुराणे चतुर्थेंऽशे त्रयोदशोऽध्यायः ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ चतुर्थेंऽशे चतुर्दशोऽध्यायः ॥

श्रीपराशर उवाच

अनमित्रस्य पुत्रः शिनिर्नामाभवत् ॥ 1 ॥ 877

तस्यापि सत्यकः सत्यकात्सात्यकिर्युयुधानापरनामा ॥ 2 ॥ 878

तस्मादपि सञ्जयः तत्पुत्रश्च कुणिः कुणेर्युगन्धरः ॥ 3 ॥ 879

इत्येते शैनेयाः ॥ 4 ॥ 880

अनमित्रस्यान्वये पृश्निस्तस्मात् श्वफल्कः तत्प्रभावः कथित एव ॥ 5 ॥ 881

श्वफल्कस्यान्यः कनीयांश्चित्रको नाम भ्राता ॥ 6 ॥ 882

श्वफल्कादक्रूरो गान्दिन्यामभवत् ॥ 7 ॥ 883

तथोपमद्गुमृदामृदविश्वारिमेजयगिरिक्षत्रोपक्षत्रशतघ्नारिमर्दनधर्मदृग्दृष्टधर्म - गन्धभोजवाहप्रतिवाहाख्याः पुत्राः ॥ 8 ॥ 884

सुताराख्या कन्या च ॥ 9 ॥ 885

देववानुपदेवश्चाक्रूरपुत्रौ ॥ 10 ॥ 886

पृथुविपृथुप्रमुखाश्चित्रकस्य पुत्रा बहवो बभूवुः ॥ 11 ॥ 887

कुकुरभजमानशुचिकम्बलबर्हिषाख्यास्तथान्धकस्य चत्वारः पुत्राः ॥ 12 ॥ 888

कुकुराद्धृष्टः तस्माच्च कपोतरोमा ततश्च विलोमा तस्मादपि तुम्बुरुसखोऽभवदनुसंज्ञश्च ॥ 13 ॥ 889

अनोरानकदुन्दुभिः ततश्चाभिजिद् अभिजितः पुनर्वसुः ॥ 14 ॥ 890

तस्याप्याहुक आहुकी च कन्या ॥ 15 ॥ 891

आहुकस्य देवकोग्रसेनौ द्वौ पुत्रौ ॥ 16 ॥ 892

देववानुपदेवः सहदेवो देवरक्षितश्च देवकस्य चत्वारः पुत्राः ॥ 17 ॥ 893

तेषां वृकदेवोपदेवा देवरक्षिता श्रीदेवा शान्तिदेवा सहदेवा देवकी च सप्त भगिन्यः ॥ 18 ॥ 894

ताश्च सर्वा वसुदेव उपयेमे ॥ 19 ॥ 895

उग्रसेनस्यापि कंसन्यग्रोधसुनामानकाह्वशङ्कुसुभूमिराष्ट्रपालयुद्धतुष्टिसुतुष्टिमत्संज्ञाः पुत्रा बभूवुः ॥ 20 ॥ 896

कंसाकंसवतीसुतनुराष्ट्रपालिकाह्वाश्चोग्रसेनस्य तनूजाः कन्याः ॥ 21 ॥ 897

भजमानाच्च विदूरथः पुत्रोऽभवत् ॥ 22 ॥ 898

विदूरथाच्छूरः शूराच्छमी शमिनः प्रतिक्षत्रः तस्मात्स्वयंभोजस्ततश्च ह्रदिकः ॥ 23 ॥ 899

तस्यापि कृतवर्मशतधनुर्देवार्हदेवगर्भाद्याः पुत्रा बभूवुः ॥ 24 ॥ 900

देवगर्भस्यापि शूरः ॥ 25 ॥ 901

शूरस्यापि मारिषा नाम पत्यभवत् ॥ 26 ॥ 902

तस्यां चासौ दशपुत्रानजनयद्वसुदेवपूर्वान् ॥ 27 ॥ 903

वसुदेवस्य जातमात्रस्यैव तद्गृहे भगवदंशावतारमव्याहतदृष्ट्या पश्यद्भिर्देवैर्दिव्यानकदुन्दुभयो वादिताः ॥ 28 ॥ 904

ततश्चासावानकदुन्दुभिसंज्ञामवाप ॥ 29 ॥ 905

तस्य च देवभागदेवश्रवोऽष्टककुचक्र वत्सधारकसृञ्जयश्यामशमिकगण्डूषसंज्ञा नव भ्रातरोऽभवन् ॥ 30 ॥ 906

पृथा श्रुतदेवा श्रुतकीर्तिः श्रुतश्रवा राजाधिदेवी च वसुदेवादीनां पञ्च भगिन्योऽभवन् ॥ 31 ॥ 907

शूरस्य कुन्तर्नाम सखाभवत् ॥ 32 ॥ 908

तस्मै चापुत्राय पृथामात्मजां विधिना शूरो दत्तवान् ॥ 33 ॥ 909

तां च पाण्डुरुवाह ॥ 34 ॥ 910

तस्यां च धर्मानिलेन्द्रैर्युधिष्ठिरभीमसेनार्जुनाख्यास्त्रयः पुत्रास्समुत्पादिताः ॥ 35 ॥ 911

पूर्वमेवानूढायाञ्च भगवता भास्वता कानीनः कर्णो नाम पुत्रोऽजन्यत ॥ 36 ॥ 912

तस्याश्च सपत्नी माद्री नामाभूत् ॥ 37 ॥ 913

तस्यां च नासत्यदस्राभ्यां नकुलसहदेवौ पाण्डोः पुत्रौ जनितौ ॥ 38 ॥ 914

श्रुतदेवां तु वृद्धधर्मा नाम कारूश उपयेमे ॥ 39 ॥ 915

तस्यां च दन्तवक्रो नाम महासुरो जज्ञे ॥ 40 ॥ 916

श्रुतकीर्तिमपि केकयराज उपयेमे ॥ 41 ॥ 917

तस्यां च सन्तर्दनादयः कैकेयाः पञ्च पुत्रा बभूवुः ॥ 42 ॥ 918

राजाधिदेव्यामावन्त्यौ विन्दानुविन्दौ जज्ञाते ॥ 43 ॥ 919

श्रुतश्रवसमपि चेदिराजो दमघोषनामोपयेमे ॥ 44 ॥ 920

तस्यां च शिशुपालमुत्पादयामास ॥ 45 ॥ 921

स वा पूर्वमप्युदारविक्रमो दैत्यानामादिपुरुषो हिरण्यकशिपुरभवत् ॥ 46 ॥ 922

यश्च भगवता सकललोकगुरुणा नरसिंहेन घातितः ॥ 47 ॥ 923

पुनरपि
अक्षयवीर्यशौर्यसम्पत्पराक्रमगुणस्समाक्रान्तसकलत्रैलोक्येश्वरप्रभावो दशाननो नामाभूत् ॥ 48 ॥ 924

बहुकालोपभुक्तभगवत्सकाशावाप्तशरीरपातोद्भवपुण्यफलो भगवता राघवरूपिणा सोऽपि निधनमुपपादितः ॥ 49 ॥ 925

पुनश्चैदिराजस्य दमघोषस्यात्मजश्शिशुपालनामाभवत् ॥ 50 ॥ 926

शिशुपालत्वेऽपि भगवतो भूभारावतारणायावतीर्णांशस्य पुण्डरीकनयनाख्यस्योपरि द्वेषानुबन्धमतितराञ्चकार ॥ 51 ॥ 927

भगवता च स निधनमुपनीतस्तत्रैव परमात्मभूते मनस एकाग्रतया सायुज्यमवाप ॥ 52 ॥ 928

भगवान् यदि प्रसन्नो यथाभिलषितं ददाति तथा अप्रसन्नोऽपि निघ्नन् दिव्यमनुपमं स्थानं प्रयच्छति ॥ 53 ॥ 929

॥ इति श्रीविष्णुपुराणे चतुर्थेंऽशे चतुर्दशोऽध्यायः ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ चतुर्थेंऽशे पञ्चदशोऽध्यायः ॥

श्रीमैत्रेय उवाच

हिरण्यकशिपुत्वे च रावणत्वे च विष्णुना।
अवाप निहतो भोगानप्राप्यानमरैरपि ॥ 1 ॥ 930

न लयं तत्र तेनैव निहतः स कथं पुनः।
सम्प्राप्तः शिशुपालत्वे सायुज्यं शाश्वते हरै ॥ 2 ॥ 931

एतदिच्छाम्यहं श्रोतुं सर्वधर्मभृतां वर।
कौतूहलपरेणैतत्पृष्टो मे वक्तुमर्हसि ॥ 3 ॥ 932

श्रीपराशर उवाच

दैत्येश्वरस्य वधायाखिललोकोतत्पत्तिस्थितिविनाशकारिणा पूर्वं तनुग्रहणं
कुर्वता नृसिंहरूपमाविष्कृतम् ॥ 4 ॥ 933

तत्र च हिरण्यकशिपोर्विष्णुरयमित्येतन्न मनस्यभूत् ॥ 5 ॥ 934

निरतिशयपुण्यसमुद्भूतमेतत्सत्त्वजातमिति ॥ 6 ॥ 935

रज उद्रेकप्रेरितैकाग्रमतिस्तद्भावनायोगात्ततोऽवाप्तवधहैतुकीं
निरतिशयामेवाखिलत्रैलोक्याधिक्यधारिणीं दशाननत्वे
भोगसम्पदमवाप ॥ 7 ॥ 936

न तु स तस्मिन्ननादिनिधने परब्रह्मभूते भगवत्यनालम्बिनि कृते
मनसस्तल्लयमवाप ॥ 8 ॥ 937

एवं दशाननत्वेऽप्यनङ्गपराधीनतया जानकीसमासक्तचेतसा भगवता
दाशरथिरूपधारिणा हतस्य तद्रूपदर्शनमेवासीत् नायमच्युत
इत्यासक्तिर्विपद्यतोऽन्तःकरणे मानुषबुद्धिरेव केवलमस्याभूत् ॥ 9 ॥ 938

पुनरप्यच्युतविनिपातमात्रफलमखिलभूमण्डलश्लाघ्यचेदिराजकुले जन्म
अव्याहतैश्वर्य शिशुपालत्वेऽप्यवाप ॥ 10 ॥ 939

तत्र त्वखिलानामेव स भगवन्नाम्नां त्वङ्कारकारणमभवत् ॥ 11 ॥ 940

ततश्च तत्कालकृतानां तेषामशेषाणामेवाच्युतनाम्नामनवरतमनेकजन्मसु
वर्द्धितविद्वेषानुबन्धिचित्तो विनिन्दनसन्तर्जनादिषूच्चारणमकरोत् ॥ 12 ॥ 941

तच्च रूपमुत्फुल्लपद्मदलामलाक्षमत्युज्ज्वलपीतवस्त्रधार्यमलकिरीटकेयूर -
हारकटकादिशोभितमुदारचतुर्बाहुशङ्खचक्रगदाधरमतिप्ररूढ -
वैरानुभावादटनभोजनस्नानासनशयनादिष्वशेषावस्थान्तरेषु
नान्यत्रोपययावस्य चेतसः ॥ 13 ॥ 942

ततस्तमेवाक्रोशेषूच्चारयंस्तमेव हृदयेन धारयन्नात्मवधाय
यावद्भगवद्धस्तचक्रांशुमालोन्वलमक्षयतेजस्स्वरूपं
ब्रह्मभूतमपगतद्वेषादिदोषं भगवन्तमद्राक्षीत् ॥ 14 ॥ 943

तावच्च भगवच्चक्रेणाशुव्यापादितस्तत्स्मरणदग्धाखिलाघसङ्घयो
भगवतान्तमुपनीतस्तस्मिन्नेव लयमुपययौ ॥ 15 ॥ 944

एतत्तवाखिलं मयाभिहितम् ॥ 16 ॥ 945

अयं हि भगवान् कीर्तितश्च संस्मृतश्च द्वेषानुबन्धेनापि
अखिलसुरासुरादिदुर्लभं फलं प्रयच्छति किमुत
सम्यग्भक्तिमतामिति ॥ 17 ॥ 946

वसुदेवस्य त्वानकदुन्दुभेः पौरवीरोहिणीमदिराभद्रादेवकीप्रमुखा बह्व्यः पत्न्योऽभवन्॥ 18॥ 947

बलभद्रशठसारणदुर्मदादीन्पुत्रान्रोहिण्यामानकदुन्दुभिरुत्पादयामास॥ 19॥ 948

बलदेवोऽपि रेवत्यां विशठोल्मुकौ पुत्रावजनयत्॥ 20॥ 949

सार्ष्टिमार्ष्टिशिशुसत्यधृतिप्रमुखाः सारणात्मजाः॥ 21॥ 950

भद्राश्वभद्रबाहुदुर्दमभूताद्या रोहिण्याः कुलजाः॥ 22॥ 951

नन्दोपनन्दकृतकाद्या मदिरायास्तनयाः॥ 23॥ 952

भद्रायाश्चोपनिधिगदाद्याः॥ 24॥ 953

वैशाल्यां च कौशिकमेकमेवाजनयत्॥ 25॥ 954

आनकदुन्दुभेर्देवक्यामपि कीर्तिमत्सुषेणोदायुभद्रसेनऋजुदासभद्रदेवाख्याः षद् पुत्रा जज्ञिरे॥ 26॥ 955

तांश्च सर्वानेव कंसो घातितवान्॥ 27॥ 956

अनन्तरं च सप्तमं गर्भमर्द्धरात्रे भगवत्प्रहिता योगनिद्रा रोहिण्या जठरमाकृष्य नीतवती॥ 28॥ 957

कर्षणाच्चासावपि संकर्षणाख्यामगमत्॥ 29॥ 958

ततश्च सकलजगन्महातरुमूलभूतो भूतभविष्यदादिसकलसुरासुरमुनिजन - मनसामप्यगोचरोऽब्जभवप्रमुखैरनलमुखैः प्रणम्यावनिभारहरणाय प्रसादितो भगवाननादिमध्यनिधनो देवकीगर्भमवततार वासुदेवः॥ 30॥ 959

तत्प्रसादविवर्द्धमानोरुमहिमा च योगनिद्रा नन्दगोपपत्न्या यशोदाया गर्भमधिष्ठितवती॥ 31॥ 960

सुप्रसन्नादित्यचन्द्रादिग्रहमव्यालादिभयं
स्वस्थमानसमखिलमेवैतज्जगदपास्ताधर्ममभवत्तस्मिंश्च पुण्डरीकनयने
जायमाने ॥ 32 ॥ 961

जातेन च तेनाखिलमेवैतत्सन्मार्गवर्त्ति जगदक्रियत् ॥ 33 ॥ 962

भगवतोऽप्यत्र मंर्त्यलोकेऽवतीर्णस्य षोडशसहस्राण्येकोत्तरशताधिकानि
भार्याणामभवन् ॥ 34 ॥ 963

तासां च रुक्मिणीसत्यभामाजाम्बवतीचारुहासिनीप्रमुखा ह्यष्टौ पत्न्यः
प्रधाना बभूवुः ॥ 35 ॥ 964

तासु चाष्टावयुतानि लक्षं च पुत्राणां
भगवानखिलमूतिरनादिमानजनयत् ॥ 36 ॥ 965

तेषां च प्रद्युम्नचारुदेष्णसाम्बादयस्त्रयोदश प्रधानाः ॥ 37 ॥ 966

प्रद्युम्नोऽपि रुक्मिणस्तनयां रुक्मवती नामोपयेमे ॥ 38 ॥ 967

तस्यामनिरुद्धो जज्ञे ॥ 39 ॥ 968

अनिरुद्धोऽपि रुक्मिण एव पौत्रीं सुभद्रां नामोपयेमे ॥ 40 ॥ 969

तस्यामस्य वज्रो जज्ञे ॥ 41 ॥ 970

वज्रस्य प्रतिबाहुस्तस्यापि सुचारुः ॥ 42 ॥ 971

एवमनेकशतसहस्रपुरुषसंख्यस्य यदुकुलस्य पुत्रसंख्या वर्षशतेरपि वक्तुं न
शक्यते ॥ 43 ॥ 972

यतो हि श्लोकाविमावत्र चरितार्थौ ॥ 44 ॥ 973

तिस्रः कोट्यस्सहस्राणामष्टाशीतिशतानि च।
कुमाराणां गृहाचार्याश्चापयोगेषु ये रताः॥ **45**॥ 974

संख्यानं यादवानां कः करिष्यति महात्मनाम्।
यत्रायुतानामयुतलक्षेणास्ते सदाहुकः॥ **46**॥ 975

देवासुरे हता ये तु दैतेयास्सुमहाबलाः।
उत्पन्नास्ते मनुष्येषु जनोपद्रवकारिणः॥ **47**॥ 976

तेषामुत्सादनार्थाय भुवि देवा यदोः कुले।
अवतीर्णाः कुलशतं यत्रैकाभ्यधिकं द्विज॥ **48**॥ 977

विष्णुस्तेषां प्रमाणे च प्रभुत्वे च व्यवस्थितः।
निदेशस्थायिनस्तस्य ववृधुस्सर्वयादवाः॥ **49**॥ 978

इति प्रसूतिं वृष्णीनां यः शृणोति नरः सदा।
स सर्वैः पातकैर्मुक्तो विष्णुलोकं प्रपद्यते॥ **50**॥ 979

॥ इति श्रीविष्णुपुराणे चतुर्थेंऽशे पञ्चदशोऽध्यायः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ चतुर्थेंऽशे षोडशोऽध्यायः ॥

श्रीपराशर उवाच

इत्येष समासतस्ते यदोर्वंशः कथितः ॥ 1 ॥ 980

अथ तुर्वसोर्वंशमवधारय ॥ 2 ॥ 981

तुर्वसोर्वह्निरात्मजः वह्नेर्भार्गो भार्गाद्भानुस्ततश्च त्रयीसानुस्तस्माच्च करन्दमस्तस्यापि मरुत्तः ॥ 3 ॥ 982

सोऽनपत्योऽभवत् ॥ 4 ॥ 983

ततश्च पौरवं दुष्यन्तं पुत्रमकल्पयत् ॥ 5 ॥ 984

एवं ययातिशापात्तद्वंशः पौरवमेव वंशं समाश्रितवान् ॥ 6 ॥ 985

॥ इति श्रीविष्णुपुराणे चतुर्थेंऽशे षोडशोऽध्यायः ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ चतुर्थेंऽशे सप्तदशोऽध्यायः ॥

श्रीपराशर उवाच

हुह्योस्तु तनयो बभ्रुः ॥ 1 ॥ 986

बभ्रोस्सेतुः ॥ 2 ॥ 987

सेतुपुत्र आरब्धनामा ॥ 3 ॥ 988

आरब्धस्यात्मजो गान्धारो गान्धारस्य धर्मो धर्माद् घृतः घृताद् दुर्दमस्ततः प्रचेताः ॥ 4 ॥ 989

प्रचेतसः पुत्रशशतधर्मो बहुलानां म्लेच्छानामुदीच्यानामाधिपत्यमकरोत् ॥ 5 ॥ 990

॥ इति श्रीविष्णुपुराणे चतुर्थेंऽशे सप्तदशोऽध्यायः ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ चतुर्थेंऽशे अष्टादशोऽध्यायः ॥

श्रीपराशर उवाच

ययातेश्चतुर्थपुत्रस्यानोस्सभानलचक्षुःपरमेषुसंज्ञास्त्रयः पुत्राः बभूवुः ॥ 1 ॥ 991

सभानलपुत्रः कालानलः ॥ 2 ॥ 992

कालानलात्सृञ्जयः ॥ 3 ॥ 993

सृञ्जयात्पुरञ्जयः ॥ 4 ॥ 994

पुरञ्जयाज्जनमेजयः ॥ 5 ॥ 995

तस्मान्महाशालः ॥ 6 ॥ 996

तस्माच्च महामनाः ॥ 7 ॥ 997

तस्मादुशीनरतितिक्षू द्वौ पुत्रावुत्पन्नौ ॥ 8 ॥ 998

उशीनरस्यापि शिबिनृगनरकृमिवर्माख्याः पञ्च पुत्रा बभूवुः ॥ 9 ॥ 999

पृषदर्भसुवीरकेकयमद्रकाश्चत्वारश्शिबिपुत्राः ॥ 10 ॥ 1000

तितिक्षोरपि रुशद्रथः पुत्रोऽभूत् ॥ 11 ॥ 1001

तस्यापि हेमो हेमस्यापि सुतपाः सुतपसश्च बलिः ॥ 12 ॥ 1002

यस्य क्षेत्रे दीर्घतमसाङ्गवङ्गकलिङ्गसुह्यपौण्ड्राख्यं वालेयं क्षत्रमजन्यत ॥ 13 ॥ 1003

तन्नामसन्ततिसंज्ञाश्च पञ्चविषया बभूवुः ॥ 14 ॥ 1004

अङ्गादनपानस्ततो दिविरथस्तस्माद्धर्मरथः ॥ 15 ॥ 1005

ततश्चित्ररथो रोमपादसंज्ञः ॥ 16 ॥ 1006

यस्य दशरथो मित्रं जज्ञे ॥ 17 ॥ 1007

यस्याजपुत्रो दशरथश्शान्तां नाम कन्यामनपत्यस्य दुहितृत्वे युयोज ॥ 18 ॥ 1008

रोमपादाच्चतुरङ्गस्तस्मात्पृथुलाक्षः ॥ 19 ॥ 1009

ततश्चम्पो यश्चम्पां निवेशयामास ॥ 20 ॥ 1010

चम्पस्य हर्यङ्गो नामात्मजोऽभूत् ॥ 21 ॥ 1011

हर्यङ्गाद्भद्ररथो भद्ररथाद्बृहद्रथो बृहद्रथाद्बृहत्कर्मा बृहत्कर्मणश्च
बृहद्भानुस्तस्माच्च बृहन्मना बृहन्मनसो जयद्रथः ॥ 22 ॥ 1012

जयद्रथो ब्रह्मक्षत्रान्तरालसम्भूत्यां पत्न्यां विजयं नाम पुत्रमजीजनत् ॥ 23 ॥ 1013

विजयश्च धृतिं पुत्रमवाप ॥ 24 ॥ 1014

तस्यापि धृतव्रतः पुत्रोऽभूत् ॥ 25 ॥ 1015

धृतव्रतात्सत्यकर्मा ॥ 26 ॥ 1016

सत्यकर्मणस्त्वतिरथः ॥ 27 ॥ 1017

यो गङ्गाङ्गतो मञ्जूषागतं पृथापविद्धं कर्णं पुत्रमवाप ॥ 28 ॥ 1018

कर्णाद्वृषसेनः इत्येतदन्ता अङ्गवंश्याः ॥ 29 ॥ 1019

अतश्च पुरुवंशं श्रोतुमर्हसि ॥ 30 ॥ 1020

॥ इति श्रीविष्णुपुराणे चतुर्थेंऽशे अष्टादशोऽध्यायः ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ चतुर्थेंऽशे एकोनविंशोऽध्यायः ॥

श्रीपराशर उवाच

पुरोर्जनमेजयस्तस्यापि प्रचिन्वान् प्रचिन्वतः प्रवीरः
प्रवीरान्मनस्युर्मनस्योश्चाभयदस्तस्यापि सुद्युस्सुद्योर्बहुगतस्तस्यापि
संयातिस्संयातेरहंयातिस्ततो रौद्राश्वः ॥ 1 ॥ 1021

ऋतेषुकक्षेषुस्थण्डिलेषुकृतेषुजलेषुधर्मेषुधृतेषुस्थलेषुसन्नतेषुवनेषुनामानो
रौद्राश्वस्य दश पुत्रा बभूवुः ॥ 2 ॥ 1022

ऋतेषोरन्तिनारः पुत्रोऽभूत् ॥ 3 ॥ 1023

सुमतिमप्रतिरथं ध्रुवं चाप्यन्तिनारः पुत्रानवाप ॥ 4 ॥ 1024

अप्रतिरथस्य कण्वः पुत्रोऽभूत् ॥ 5 ॥ 1025

तस्यापि मेधातिथिः ॥ 6 ॥ 1026

यतः काण्वायना द्विजा बभूवुः ॥ 7 ॥ 1027

अप्रतिरथस्यापरः पुत्रोऽभूदैलीनः ॥ 8 ॥ 1028

ऐलीनस्य दुष्यन्ताद्याश्चत्वारः पुत्रा बभूवुः ॥ 9 ॥ 1029

दुष्यन्ताच्चक्रवर्ती भरतोऽभूत् ॥ 10 ॥ 1030

यन्नामहेतुर्देवेश्लोको गीयते ॥ 11 ॥ 1031

माता भस्त्रा पितुः पुत्रो येन जातः स एव सः।
भरस्व पुत्रं दुष्यन्त मावमंस्थाश्शकुन्तलाम्॥ 12॥ 1032

रेतोधाः पुत्रो नयति नरदेव यमक्षयात्।
त्वं चास्य धाता गर्भस्य सत्यमाह शकुन्तला॥ 13॥ 1033

भरतस्य पत्नीत्रये नव पुत्रा बभूवुः॥ 14॥ 1034

नैते ममानुरूपा इत्यभिहितास्तन्मातरः परित्यागभयात्तत्पुत्राञ्जघ्नुः॥ 15॥ 1035

ततोऽस्य वितथे पुत्रजन्मनि पुत्रार्थिनो मरुत्सोमयाजिनो दीर्घतमसः
पाष्ण्र्यपास्ताद्बृहस्पतिवीर्यादुतथ्यपत्न्यां ममतायां समुत्पन्नो भरद्वाजाख्यः
पुत्रो मरुद्भिर्दत्तः॥ 16॥ 1036

तस्यापि नामनिर्वचनश्लोकः पठ्यते॥ 17॥ 1037

मूढे भर द्वाजमिमं भर द्वाजं बृहस्पते।
यातौ यदुक्त्वा पितरौ भरद्वाजस्ततस्त्वयम्॥ 18॥ 1038

भरद्वाजस्स वितथे पुत्रजन्मनि मरुद्भिर्दत्तस्ततो वितथसंज्ञामवाप॥ 19॥ 1039

वितथस्यापि मन्युः पुत्रोऽभवत्॥ 20॥ 1040

बृहत्क्षत्रमहावीर्यनरगर्गा अभनवन्मन्युपुत्राः॥ 21॥ 1041

नरस्य सङ्कृतिस्सङ्कृतेर्गुरुप्रीतिरन्तिदेवौ॥ 22॥ 1042

गर्गाच्छिनिः ततश्च गार्ग्याश्शैन्याः क्षत्रोपेता द्विजातयो बभूवुः॥ 23॥ 1043

महावीर्याच्च दुरुक्षयो नाम पुत्रोऽभवत्॥ 24॥ 1044

तस्य त्रय्यारुणिः पुष्करिण्यो कपिश्च पुत्रत्रयमभूत्॥ 25॥ 1045

तच्च पुत्रत्रितयमपि पश्चाद्विप्रतामुपजगाम॥ 26॥ 1046

बृहत्क्षत्रस्य सुहोत्रः ॥ 27 ॥ 1047

सुहोत्राद्धस्ती य इदं हस्तिनापुरमावासयामास ॥ 28 ॥ 1048

अजमीढद्विजमीढपुरुमीढास्त्रयो हस्तिनस्तनयाः ॥ 29 ॥ 1049

अजमीढात्कण्वः ॥ 30 ॥ 1050

कण्वानमेधातिथिः ॥ 31 ॥ 1051

यतः काण्वायना द्विजाः ॥ 32 ॥ 1052

अजमीढस्यान्यः पुत्रो बृहदिषुः ॥ 33 ॥ 1053

बृहदिषोर्बृहद्धनुर्बृहद्धनुषश्च बृहत्कर्मा ततश्च जयद्रथस्तस्मादपि विश्वजित् ॥ 34 ॥ 1054

ततश्च सेनजित् ॥ 35 ॥ 1055

रुचिराश्वकाश्यदृढहनुवत्सहनुसंज्ञास्सेनजितः पुत्राः ॥ 36 ॥ 1056

रुचिराश्वपुत्रः पृथुसेनः पुथुसेनात्यारः ॥ 37 ॥ 1057

पारान्नीलः ॥ 38 ॥ 1058

तस्यैकशतं पुत्राणाम् ॥ 39 ॥ 1059

तेषां प्रधानः काम्पिल्याधिपतिस्समरः ॥ 40 ॥ 1060

समरस्यापि पारसुपारसदश्चास्त्रयः पुत्राः ॥ 41 ॥ 1061

सुपारात्पृथुः पृथोस्सुकृतिस्ततो विभ्राजः ॥ 42 ॥ 1062

तस्माच्चाणुहः ॥ 43 ॥ 1063

यश्शुकदुहितरं कीर्ति नामोपयेमे ॥ 44 ॥ 1064

अणुहाद्ब्रह्मदत्तः ॥ 45 ॥ 1065

ततश्च विष्वक्सेनस्तस्मादुदक्सेनः ॥ 46 ॥ 1066

भल्लाभस्तस्य चात्मजः ॥ 47 ॥ 1067

द्विजमीढस्य तु यवीनरसंज्ञः पुत्रः ॥ 48 ॥ 1068

तस्यापि धृतिमांस्तस्माच्च सत्यधृतिस्ततश्च दृढनेमिस्तस्माच्च सुपार्श्ववस्ततस्सुमतिस्ततश्च सन्नतिमान् ॥ 49 ॥ 1069

सन्नतिमतः कृतः पुत्रोऽभूत् ॥ 50 ॥ 1070

यं हिरण्यनाभो योगमध्यापयामास ॥ 51 ॥ 1071

यश्चतुर्विंशतिं प्राच्यसामगानां संहिताश्चकार ॥ 52 ॥ 1072

कृताच्चोग्रायुधः ॥ 53 ॥ 1073

येन प्राचुर्येण नीपक्षयः कृतः ॥ 54 ॥ 1074

उग्रायुधात्क्षेम्यः क्षेम्यात्सुधीरस्तस्मादरिपुञ्जयस्तस्माच्च बहुरथ इत्येते पौरवाः ॥ 55 ॥ 1075

अजमीढस्य नलिनी नाम पत्नी तस्या नीलसंज्ञः पुत्रोऽभवत् ॥ 56 ॥ 1076

तस्मादपि शान्तिः शान्तेस्सुशान्तिस्सुशान्तेः पुरञ्जयस्तस्माच्च ऋक्षः ॥ 57 ॥ 1077

ततश्च हर्यश्वः ॥ 58 ॥ 1078

तस्मान्मुद्गलसृञ्जयबृहदिषुयवीनरकाम्पिल्यसंज्ञाः पञ्चानामेव तेषां विषयाणां रक्षणायालमेते मत्पुत्रा इति पित्राभिहिताः पाञ्चालाः ॥ 59 ॥ 1079

मुद्गलाच्च मौद्गल्याः क्षत्रोपेता द्विजातयो बभूवुः ॥ 60 ॥ 1080

मुद्गलादबृहदश्वः ॥ 61 ॥ 1081

बृहदश्वाहिवोदासोऽहल्या च मिथुनमभूत् ॥ 62 ॥ 1082

शरद्वतश्चाहल्यायां शतानन्दोऽभवत् ॥ 63 ॥ 1083

शतानन्दात्सत्यधृतिर्धनुर्वेदान्तगो जज्ञे ॥ 64 ॥ 1084

सत्यधृतेर्वराप्सरसमुर्वशीं दृष्ट्वा रेतस्कन्नं शरस्तम्बे पपात ॥ 65 ॥ 1085

तच्च द्विधागतमपत्यद्वयं कुमारः कन्या चाभवत् ॥ 66 ॥ 1086

तौ च मृगयामुपयातश्शान्तनुदृष्ट्वा कृपया जग्राह ॥ 67 ॥ 1087

ततः कुमारः कृपः कन्या चाश्वत्थाम्नो जननी कृपी द्रोणाचार्यस्य पत्न्यभवत् ॥ 68 ॥ 1088

दिवोदासस्य पुत्रो मित्रायुः ॥ 69 ॥ 1089

मित्रायोश्च्यवनो नाम राजा ॥ 70 ॥ 1090

च्यवनात्सुदासः सुदासात्सौदासः सौदासात्सहदेवस्तस्यापि सोमकः ॥ 71 ॥ 1091

सोमकाज्जन्तुः पुत्रशतज्येष्ठोऽभवत् ॥ 72 ॥ 1092

तेषां यवीयान् पृषतः पृषताद्द्रुपदस्तस्माच्च धृष्टद्युम्नस्ततो धृष्टकेतुः ॥ 73 ॥ 1093

अजमीढस्यान्य ऋक्षनामा पुत्रोऽभवत् ॥ 74 ॥ 1094

तस्य संवरणः ॥ 75 ॥ 1095

संवरणात्कुरुः ॥ 76 ॥ 1096

य इदं धर्मक्षेत्रं कुरुक्षेत्रं चकार ॥ 77 ॥ 1097

सुधनुर्जह्नुपरीक्षित्प्रमुखाः कुरोः पुत्रा बभूवुः ॥ 78 ॥ 1098

सुधनुषः पुत्रस्सुहोत्रस्तस्माच्च्यवनश्च्यवनात् कृतकः ॥ 79 ॥ 1099

ततश्चोपरिचरो वसुः ॥ 80 ॥ 1100

बृहद्रथप्रत्यग्रकुशाम्बुकुचेलमात्स्यप्रमुखा वसोः पुत्रास्सप्ताजायन्त ॥ 81 ॥ 1101

बृहद्रथात्कुशाग्रः कुशाग्राद्वृषभो वृषभात् पुष्पवान्
तस्मात्सत्यहितस्तस्मात्सुधन्वा तस्य च जतुः ॥ 82 ॥ 1102

बृहद्रथाच्चान्यशशकलद्वयजन्मा जरया संहितो जरासन्धनामा ॥ 83 ॥ 1103

तस्मात्सहदेवस्सहदेवात्सोमपस्ततश्च श्रुतिश्रवाः ॥ 84 ॥ 1104

इत्येते मया मागधा भूपालाः कथिताः ॥ 85 ॥ 1105

॥ इति श्रीविष्णुपुराणे चतुर्थेंऽशे एकोनविंशोऽध्यायः ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ चतुर्थेंऽशे विंशोऽध्यायः ॥

श्रीपराशर उवाच

परीक्षितो जनमेजयश्रुतसेनोग्रसेनभीमसेनाश्चत्वारः पुत्राः ॥ 1 ॥ 1106

जह्नोस्तु सुरथो नामात्मजो बभूव ॥ 2 ॥ 1107

तस्यापि विदूरथः ॥ 3 ॥ 1108

तस्मात्सार्वभौमस्सार्वभौमाज्जयत्सेनस्तस्मादाराधितस्ततश्चा -
युतायुरयुतायोरक्रोधनः ॥ 4 ॥ 1109

तस्माद्देवातिथिः ॥ 5 ॥ 1110

ततश्च ऋक्षोऽन्योऽभवत् ॥ 6 ॥ 1111

ऋक्षाद्भीमसेनस्ततश्च दिलीपः ॥ 7 ॥ 1112

दिलीपात् प्रतीपः ॥ 8 ॥ 1113

तस्यापि देवापिशान्तनुबाह्वीकसंज्ञास्त्रयः पुत्रा बभूवुः ॥ 9 ॥ 1114

देवापिर्बाल एवारण्यं विवेश ॥ 10 ॥ 1115

शान्तनुस्तु महीपालोऽभूत् ॥ 11 ॥ 1116

अयं च तस्य श्लोकः पृथिव्यां गीयते ॥ 12 ॥ 1117

यं यं कराभ्यां स्पृशति जीर्णं यौवनमेति सः।
शान्तिं चाप्नोति येनाग्र्यां कर्मणा तेन शान्तनुः॥ 13॥ 1118

तस्य च शान्तनो राष्ट्रे द्वादशवर्षाणि देवो न ववर्ष॥ 14॥ 1119

ततश्चाशेषराष्ट्रविनाशमवेक्ष्यासौ राजा ब्राह्मणानपृच्छत् कस्मादस्माकं राष्ट्रे देवो न वर्षति को ममापराध इति॥ 15॥ 1120

ततश्च तमूचुर्ब्राह्मणाः॥ 16॥ 1121

अग्रजस्य ते हीयमवनिस्त्वया सम्भुज्यते अतः परिवेत्ता त्वमित्युक्तस्स राजा पुनस्तानपृच्छत्॥ 17॥ 1122

किं मयात्र विधेयमिति॥ 18॥ 1123

ततस्ते पुनरप्यूचुः॥ 19॥ 1124

यावद्देवापिर्न पतनादिभिर्दोषैरभिभूयते तावदेतत्तस्यार्हं राज्यम्॥ 20॥ 1125

तदलमेतेन तु तस्मै दीयतामित्युक्ते तस्य मन्त्रिप्रवरेणाश्मसारिणा तत्रारण्ये तपस्विनो वेदवादविरोधवक्तारः प्रयुक्ताः॥ 21॥ 1126

तैरस्याप्यतिऋजुमतेर्महीपतिपुत्रस्य
बुद्धिर्वेदवादविरोधमार्गानुसारिण्यक्रियत॥ 22॥ 1127

राजा च शान्तनुर्द्विजवचनोत्पन्नपरिदेवनशोकस्तान् ब्राह्मणानग्रतः कृत्वाग्रजस्य प्रदानायारण्यं जगाम॥ 23॥ 1128

तदाश्रममुपगताश्च तमवनतमवनीपतिपुत्रं देवापिमुपतस्थुः॥ 24॥ 1129

ते ब्राह्मणा वेदवादानुबन्धीनि वचांसि राज्यमग्रजेन कर्त्तव्यमित्यर्थवन्ति तमूचुः॥ 25॥ 1130

असावपि देवापिर्वेदवादविरोधयुक्तिदूषितमनेकप्रकारं तानाह ॥ 26 ॥ 1131

ततस्ते ब्राह्मणाश्शान्तनुमूचुः ॥ 27 ॥ 1132

आगच्छ हे राजन्नलमत्रातिनिर्बन्धेन प्रशान्त एवासावनावृष्टिदोषः पतितोऽयमनादिकालमहितवेदवचनदूषणोच्चारणात् ॥ 28 ॥ 1133

पतिते चाग्रजे नैव ते परिवेतृत्वं भवतीत्युक्तश्शान्तनुःस्वपुरमागम्य राज्यमकरोत् ॥ 29 ॥ 1134

वेदवादविरोधवचनोच्चारणदूषिते च तस्मिन्देवापौ तिष्ठत्यपि ज्येष्ठभ्रातर्यखिलसस्यनिष्पत्तये ववर्ष भगवान्पर्जन्यः ॥ 30 ॥ 1135

बाह्लीकात्सोमदत्तः पुत्रोऽभूत् ॥ 31 ॥ 1136

सोमदत्तस्यापि भूरिभूरिश्रवःशल्यसंज्ञास्त्रयः पुत्रा बभूवुः ॥ 32 ॥ 1137

शान्तनोरप्यमरनद्यां जाह्नव्यामुदारकीर्तिरशेषशास्त्रार्थविद्भीष्मः पुत्रोऽभूत् ॥ 33 ॥ 1138

सत्यवत्यां च चित्राङ्गदविचित्रवीर्यौ द्वौ पुत्रावुत्यादयामास शान्तनुः ॥ 34 ॥ 1139

चित्राङ्गदस्तु बाल एव चित्राङ्गदेनैव गन्धर्वेणाहवे निहतः ॥ 35 ॥ 1140

विचित्रवीर्योऽपि काशिराजतनये अम्बिकाम्बालिके उपयेमे ॥ 36 ॥ 1141

तदुपभोगातिखेदाच्च यक्ष्मणा गृहीतः स पञ्चत्वमगमत् ॥ 37 ॥ 1142

सत्यवतीनियोगाच्च मत्पुत्रः कृष्णद्वैपायनो मातुर्वचनमनतिक्रमणीयमिति कृत्वा विचित्रवीर्यक्षेत्रे धृतराष्ट्रपाण्डू तत्प्रहितभुजिष्यायां विदुरं चोत्पादयामास ॥ 38 ॥ 1143

धृतराष्ट्रोऽपि गान्धार्या दुर्योधनदुश्शासनप्रधानं पुत्रशतमुत्पादयामास ॥ 39 ॥ 1144

पाण्डोरप्यरण्ये मृगयायामृषिशापोपहतप्रजाजननसामर्थ्यस्य धर्मवायुशक्रैर्युधिष्ठिरभीमसेनार्जुनाः कुन्त्यां नकुलसहदेवौ चाश्विभ्यां माद्र्यां पञ्चपुत्रास्समुत्पादिताः ॥ 40 ॥ 1145

तेषां च द्रौपद्यां पञ्चैव पुत्रा बभूवुः ॥ 41 ॥ 1146

युधिष्ठिरात्प्रतिविन्ध्यः भीमसेनाच्छुतसेनः श्रुतकीर्त्तिरर्जुनाच्छुतानीको नकुलाच्छुतकर्मा सहदेवात् ॥ 42 ॥ 1147

अन्ये च पाण्डवानामात्मजास्तद्यथा ॥ 43 ॥ 1148

यौधेयी युधिष्ठिराद्देवकं पुत्रमवाप ॥ 44 ॥ 1149

हिडिम्बा घटोत्कचं भीमसेनात्पुत्रं लेभे ॥ 45 ॥ 1150

काशी च भीमसेनादेव सर्वगं सुतमवाप ॥ 46 ॥ 1151

सहदेवाच्च विजया सुहोत्रं पुत्रमवाप ॥ 47 ॥ 1152

रेणुमत्यां च नकुलोऽपि निरमित्रमजीजनत् ॥ 48 ॥ 1153

अर्जुनस्याप्युलूप्यां नागकन्यायामिरावान्नाम पुत्रोऽभवत् ॥ 49 ॥ 1154

मणिपुरपतिपुत्र्यां पुत्रिकाधर्मण बभ्रुवाहनं नाम पुत्रमर्जुनोऽजनयत् ॥ 50 ॥ 1155

सुभद्रायां चार्भकत्वेऽपि योऽसावतिबलपराक्रमस्समस्तारातिरथजेता सोऽभिमन्युरजायत ॥ 51 ॥ 1156

अभिमन्योरुत्तरायां परिक्षीणेषु कुरुष्वश्वत्थामप्रयुक्तब्रह्मास्त्रेण गर्भ एव भस्मीकृतो भगवतस्सकलसुरासुरवन्दितचरणयुगलस्यात्मेच्छ्या कारणमानुषरूपधारिणोऽनुभावात्पुनर्जीवितमवाप्य परीक्षिज्जज्ञे ॥ 52 ॥ 1157

योऽयं साम्प्रतमेतद्धूमण्डलमखण्डितायतिधर्मण पालयतीति ॥ 53 ॥ 1158

॥ इति श्रीविष्णुपुराणे चतुर्थेंऽशे विंशोऽध्यायः ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ चतुर्थेंऽशे एकविंशोऽध्यायः ॥

श्रीपराशर उवाच

अतः परं भविष्यानहं भूपालान्कीर्तयिष्यामि ॥ 1 ॥ 1159

योऽयं साम्प्रतमवनीपतिः परीक्षित्तस्यापि
जनमेजयश्रुतसेनोग्रसेनभीमसेनाश्चत्वारः पुत्रा भविष्यन्ति ॥ 2 ॥ 1160

जनमेजयस्यापि शतानीको भविष्यति ॥ 3 ॥ 1161

योऽसौ याज्ञवल्क्याद्वेदमधीत्य कृपादस्त्राण्यवाप्य
विषमविषयविरक्तचित्तवृत्तिश्च शौनकोपदेशादात्मज्ञानप्रवीणः परं
निर्वाणमवाप्स्यति ॥ 4 ॥ 1162

शतानीकादश्वमेधदत्तो भविता ॥ 5 ॥ 1163

तस्मादप्यधिसीमकृष्णः ॥ 6 ॥ 1164

अधिसीमकृष्णान्निचक्रुः ॥ 7 ॥ 1165

यो गङ्गयापहते हस्तिनापुरे कौशाम्ब्यां निवत्स्यति ॥ 8 ॥ 1166

तस्याप्युष्णः पुत्रो भविता ॥ 9 ॥ 1167

उष्णाद्विचित्ररथः ॥ 10 ॥ 1168

ततः शुचिरथः ॥ 11 ॥ 1169

तस्मादवृष्णिमांस्ततस्सुषेणस्तस्यापि सुनीथस्सुनीथान्नृपचक्षुस्तस्मादपि सुखावलस्तस्य च पारिप्लवस्ततश्च सुनयस्तस्यापि मेधावी ॥ 12 ॥ 1170

मेधाविनो रिपुञ्जयस्ततो मृदुस्तस्माच्च तिग्मस्तस्माद्बृहद्रथो बृहद्रथाद्वसुदानः ॥ 13 ॥ 1171

ततोऽपरश्शतानीकः ॥ 14 ॥ 1172

तस्माच्चोदयन उदयनादहीनरस्ततश्च दण्डपाणिस्ततो निरमित्रः ॥ 15 ॥ 1173

तस्माच्च क्षेमकः ॥ 16 ॥ 1174

अत्रायं श्लोकः ॥ 17 ॥ 1175

ब्रह्मक्षत्रस्य यो योनिर्वंशो राजर्षिसत्कृतः।
क्षेमकं प्राप्य राजानं संस्थानं प्राप्स्यते कलौ ॥ 18 ॥ 1176

॥ इति श्रीविष्णुपुराणे चतुर्थेंऽशे एकविंशोऽध्यायः ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ चतुर्थेंऽशे द्वाविंशोऽध्यायः ॥

श्रीपराशर उवाच

अतश्चेक्ष्वाकवो भविष्याः पार्थिवाः कथ्यन्ते ॥ 1 ॥ 1177

बृहद्बलस्य पुत्रो बृहत्क्षणः ॥ 2 ॥ 1178

तस्मादुरुक्षयस्तस्माच्च वत्सव्यूहस्ततश्च प्रतिव्योमस्तस्मादपि दिवाकरः ॥ 3 ॥ 1179

तस्मात्सहदेवः सहदेवादबृहदश्वस्तत्सूनुर्भानुरथस्तस्य च प्रतीताश्वस्तस्यापि सुप्रतीकस्ततश्च मरुदेवस्ततः सुनक्षत्रस्तस्मात्किन्नरः ॥ 4 ॥ 1180

किन्नरादन्तरिक्षस्तस्मात्सुपर्णस्ततश्चामित्रजित् ॥ 5 ॥ 1181

ततश्च बृहद्राजस्तस्यापि धर्मी धर्मिणः कृतञ्जयः ॥ 6 ॥ 1182

कृतञ्जयाद्रणञ्जयः ॥ 7 ॥ 1183

रणञ्जयात्सञ्जयस्तस्माच्छाक्यश्शाक्याच्छुद्धोदनस्तस्माद्राहुलस्ततः प्रसेनजित् ॥ 8 ॥ 1184

ततश्च क्षुद्रकस्ततश्च कुण्डकस्तस्मादपि सुरथः ॥ 9 ॥ 1185

तत्पुत्रश्च सुमित्रः ॥ 10 ॥ 1186

इत्येते चेक्ष्वाकवो बृहद्बलान्वयाः ॥ 11 ॥ 1187

अत्रानुवंशश्लोकः ॥ 12 ॥ 1188

इक्ष्वाकूणामयं वंशस्सुमित्रान्तो भविष्यति।
यतस्तं प्राप्य राजानं संस्थां प्राप्स्यति वै कलौ॥ 13॥ 1189

॥ इति श्रीविष्णुपुराणे चतुर्थेंऽशे द्वाविंशोऽध्यायः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ चतुर्थेंऽशे त्रयोविंशोऽध्यायः ॥

श्रीपराशर उवाच

मागधानां बार्हद्रथानां भाविनामनुक्रमं कथयिष्यामि ॥ 1 ॥ 1190

अत्र हि वंशे महाबलपराक्रमा जरासन्धप्रधाना बभूवुः ॥ 2 ॥ 1191

जरासन्धस्य पुत्रः सहदेवः ॥ 3 ॥ 1192

सहदेवात्सोमापिस्तस्य श्रुतश्रवास्तस्याप्ययुतायुस्ततश्च
निरमित्रस्तत्तनयस्सुनेत्रस्तस्मादपि बृहत्कर्मा ॥ 4 ॥ 1193

ततश्च सेनजित्ततश्च श्रुतञ्जयस्ततो विप्रस्तस्य च पुत्रशशुचिनामा
भविष्यति ॥ 5 ॥ 1194

तस्यापि क्षेम्यस्ततश्च सुव्रतस्सुव्रताद्धर्मस्ततस्सुश्रवाः ॥ 6 ॥ 1195

ततो दृढसेनः ॥ 7 ॥ 1196

तस्मात्सुबलः ॥ 8 ॥ 1197

सुबलात्सुनीतो भविता ॥ 9 ॥ 1198

ततस्सत्यजित् ॥ 10 ॥ 1199

तस्माद्विश्वजित् ॥ 11 ॥ 1200

तस्यापि रिपुञ्जयः ॥ 12 ॥ 1201

इत्येते बार्हद्रथा भूपतयो वर्षसहस्रमेकं भविष्यन्ति ॥ 13 ॥ 1202

॥ इति श्रीविष्णुपुराणे चतुर्थेंऽशे त्रयोविंशोऽध्यायः ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ चतुर्थेंऽशे चतुर्विंशोऽध्यायः ॥

श्रीपराशर उवाच

योऽयं रिपुञ्जयो नाम बार्हद्रथोऽन्त्यस्तस्यामात्यो सुनिको नाम भविष्यति ॥ 1 ॥ 1203

स चैनं स्वामिनं हत्वा स्वपुत्रं प्रद्योतनामानमभिषेक्ष्यति ॥ 2 ॥ 1204

तस्यापि बलाकनामा पुत्रो भविता ॥ 3 ॥ 1205

ततश्च विशाखयूपः ॥ 4 ॥ 1206

तत्पुत्रो जनकः ॥ 5 ॥ 1207

तस्य च नन्दिवर्द्धनः ॥ 6 ॥ 1208

ततो नन्दी ॥ 7 ॥ 1209

इत्येतेऽष्टत्रिंशदुत्तरमब्दशतं पञ्च प्रद्योताः प्रथिवीं भोक्ष्यन्ति ॥ 8 ॥ 1210

ततश्च शिशुनाभः ॥ 9 ॥ 1211

तत्पुत्रः काकवर्णो भविता ॥ 10 ॥ 1212

तस्य च पुत्रः क्षेमधर्मा ॥ 11 ॥ 1213

तस्यापि क्षतौजाः ॥ 12 ॥ 1214

तत्पुत्रो विधिसारः ॥ 13 ॥ 1215

ततश्चाजातशत्रुः ॥ 14 ॥ 1216

तस्मादर्भकः ॥ 15 ॥ 1217

तस्माच्चोदयनः ॥ 16 ॥ 1218

तस्मादपि नन्दिवर्द्धनः ॥ 17 ॥ 1219

ततो महानन्दी ॥ 18 ॥ 1220

इत्येते शैशुनाभा भूपालास्त्रीणि वर्षशतानि द्विषष्ट्यधिकानि भविष्यन्ति ॥ 19 ॥ 1221

महानन्दिनस्ततश्शूद्रागर्भोद्भवोऽतिलुब्धोऽतिबलो महापद्मनामा नन्दः परशुराम इवापरोऽखिलक्षत्रान्तकारी भविष्यति ॥ 20 ॥ 1222

ततः प्रभृति शूद्रा भूपाला भविष्यन्ति ॥ 21 ॥ 1223

स चैकच्छत्रामनुल्लङ्घितशासनो महापद्मः पृथिवीं भोक्ष्यते ॥ 22 ॥ 1224

तस्याप्यष्टौ सुतास्सुमाल्याद्या भवितारः ॥ 23 ॥ 1225

तस्य महापद्मस्यानु पृथिवीं भोक्ष्यन्ति ॥ 24 ॥ 1226

महापद्मपुत्राश्चैकं वर्षशतमवनीपतयो भविष्यन्ति ॥ 25 ॥ 1227

ततश्च नव चैतान्नन्दान् कौटिल्यो ब्राह्मणस्समुद्धरिष्यति ॥ 26 ॥ 1228

तेषामभावे मौर्याः पृथिवीं भोक्ष्यन्ति ॥ 27 ॥ 1229

कौटिल्य एव चन्द्रगुप्तमुत्पन्नं राज्येऽभिषेक्ष्यति ॥ 28 ॥ 1230

तस्यापि पुत्रो बिन्दुसारो भविष्यति ॥ 29 ॥ 1231

तस्याप्यशोकवर्द्धनस्ततस्सुयशास्ततश्च दशरथस्ततश्च संयुतस्ततश्शालिशूकस्तस्मात्सोमशर्मा तस्यापि सोमशर्मणश्शतधन्वा ॥ 30 ॥ 1232

तस्यापि बृहद्रथनामा भविता ॥ 31 ॥ 1233

एवमेते मौर्य्या दश भूपतयो भविष्यन्ति अब्दशतं सप्तत्रिंशदुत्तरम् ॥ 32 ॥ 1234

तेषामन्ते पृथिवीं दश शुङ्गा भोक्ष्यन्ति ॥ 33 ॥ 1235

पुष्यमित्रस्सेनापतिस्स्वामिनं हत्वा राज्यं करिष्यति
तस्यात्मजोऽग्निमित्रः ॥ 34 ॥ 1236

तस्मात्सुज्येष्ठस्ततो वसुमित्रस्तस्मादप्युदंकस्ततः पुलिन्दकस्ततो
घोषवसुस्तस्मादपि वज्रमित्रस्ततो भागवतः ॥ 35 ॥ 1237

तस्माद्देवभूतिः ॥ 36 ॥ 1238

इत्येते शुङ्गा द्वादशोत्तरं वर्षशतं पृथिवीं भोक्ष्यन्ति ॥ 37 ॥ 1239

ततः कण्वानेषा भूर्यास्यति ॥ 38 ॥ 1240

देवभूतिं तु शुङ्गराजानं व्यसनिनं तस्यैवामात्यः काण्वो वसुदेवनामा तं
निहत्य स्वयमवनीं भोक्ष्यति ॥ 39 ॥ 1241

तस्य पुत्रो भूमित्रस्तस्यापि नारायणः ॥ 40 ॥ 1242

नारायणात्मजस्सुशर्मा ॥ 41 ॥ 1243

एते काण्वायनाश्चत्वारः पञ्चचत्वारिंशद्वर्षाणि भूपतयो भविष्यन्ति ॥ 42 ॥ 1244

सुशर्माणं तु काण्वं तदूभृत्यो बलिपुच्छकनामा हत्वान्ध्रजातीयो वसुधां
भोक्ष्यति ॥ 43 ॥ 1245

ततश्च कृष्णनामा तद्भ्राता पृथिवीपतिर्भविष्यति ॥ 44 ॥ 1246

तस्यापि पुत्रः शान्तकर्णिस्तस्यापि
पूर्णोत्सङ्गस्तत्पुत्रशशातकर्णिस्तस्माच्चलम्बोदरस्तस्माच्च पिलकस्ततो
मेघस्वातिस्ततः पटुमान् ॥ 45 ॥ 1247

ततश्चारिष्टकर्मा ततो हालाहलः ॥ 46 ॥ 1248

हालाहलात्पललकस्ततः पुलिन्दसेनस्ततः
सुन्दरस्ततश्शातकर्णिस्ततश्शिवस्वातिस्ततश्च
गोमतिपुत्रस्तत्पुत्रोऽलिमान् ॥ 47 ॥ 1249

तस्यापि शान्तकर्णिस्ततः शिवश्रितस्ततश्च शिवस्कन्धस्तस्मादपि
यज्ञश्रीस्ततो द्वियज्ञस्तस्माच्चन्द्रश्रीः ॥ 48 ॥ 1250

तस्मात्पुलोमाचिः ॥ 49 ॥ 1251

एवमेते त्रिंशच्चत्वार्यब्दशतानि षट्चञ्चाशदधिकानि पृथिवीं भोक्ष्यन्ति
आन्ध्रभृत्याः ॥ 50 ॥ 1252

सप्ताभीरप्रभृतयो दश गर्दभिलाश्च भूभुजो भविष्यन्ति ॥ 51 ॥ 1253

ततष्षोडश शका भूपतयो भवितारः ॥ 52 ॥ 1254

ततश्चाष्टौ यवनाश्चतुर्दश तुरुष्कारा मुण्डाश्च त्रयोदश एकादश मौना एते वै
पृथिवीपतयः पृथिवीं दशवर्षशतानि नवत्यधिकानि भोक्ष्यन्ति ॥ 53 ॥ 1255

ततश्च एकादश भूपतयोऽब्दशतानि त्रीणि पृथिवीं भोक्ष्यन्ति ॥ 54 ॥ 1256

तेषूत्सन्नेषु कैङ्किला यवना भूपतयो भविष्यन्त्यमूर्द्धाभिषिक्ताः ॥ 55 ॥ 1257

तेषामपत्यं विन्ध्यशक्तिस्ततः पुरञ्जयस्तस्माद्रामचन्द्रस्तस्माद्धर्मवर्मा ततो
वङ्गस्ततोऽभून्नन्दनस्ततस्सुनन्दी तद्भ्राता नन्दियशाश्शुक्रः प्रवीर एते
वर्षशतं षड्वर्षाणि भूपतयो भविष्यन्ति ॥ 56 ॥ 1258

ततस्तत्पुत्रास्त्रयोदशैते बाह्लिकाश्च त्रयः ॥ 57 ॥ 1259

ततः पुष्पमित्राः पटुमित्रास्त्रयोदशैकलाश्च सप्तान्ध्राः ॥ 58 ॥ 1260

ततश्च कोशलायां तु नव चैव भूपतयो भविष्यन्ति ॥ 59 ॥ 1261

नैषधास्तु त एव ॥ 60 ॥ 1262

मगधायां तु विश्वस्फटिकसंज्ञोऽन्यान्वर्णान्करिष्यति ॥ 61 ॥ 1263

कैवर्त्तवटुपुलिन्दब्राह्मणान्राज्ये स्थापयिष्यति ॥ 62 ॥ 1264

उत्साद्याखिलक्षत्रजातिं नव नागाः पद्मावत्यां नाम पुर्यामनुगङ्गाप्रयागं गयायाञ्च मागधा गुप्ताश्च भोक्ष्यन्ति ॥ 63 ॥ 1265

कोशलान्ध्रपुण्ड्रताम्रलिप्तसमुद्रतटपुरीं च देवरक्षितो रक्षिता ॥ 64 ॥ 1266

कलिङ्गमाहिषमहेन्द्रभौमान् गुहा भोक्ष्यन्ति ॥ 65 ॥ 1267

नैषधनैमिषककालकोशकाञ्जनपदान्मणिधान्यकवंशा भोक्ष्यन्ति ॥ 66 ॥ 1268

त्रैराज्यमुषिकजनपदान्कनकाह्वयो भोक्ष्यति ॥ 67 ॥ 1269

सौराष्ट्रावन्तिशूद्राभीरान्नर्मदामरुभूविषयांश्च ब्रात्यद्विजाभीरशूद्राद्या भोक्ष्यन्ति ॥ 68 ॥ 1270

सिन्धुतटदाविकोर्वीचन्द्रभागाकाश्मीरविषयांश्च ब्रात्यम्लेच्छशूद्रादयो भोक्ष्यन्ति ॥ 69 ॥ 1271

एते च तुल्यकालास्सर्वे पृथिव्यां भूभुजो भविष्यन्ति ॥ 70 ॥ 1272

अल्पप्रसादा बृहत्कोपास्सर्वकालमनृताधर्मरुचयः स्त्रीबालगोवधकर्त्तारः परस्वादानरुचयोऽल्पसारास्तमिस्रप्राया उदितास्तमितप्राया अल्पायुषो महेच्छा ह्यल्पधर्मा लुब्धाश्च भविष्यन्ति ॥ 71 ॥ 1273

तैश्च विमिश्रा जनपदास्तच्छीलानुवर्त्तिनो राजाश्रयशुष्मिणो म्लेच्छाश्चार्याश्च विपर्ययेण वर्त्तमानाः प्रजाः क्षपयिष्यन्ति ॥ 72 ॥ 1274

ततश्चानुदिनमल्पाल्पह्रासव्यवच्छेदाद्धर्मार्थयोर्जगतस्संङ्क्षयो भविष्यति ॥ 73 ॥ 1275

ततश्चार्थ एवाभिजनहेतुः ॥ 74 ॥ 1276

बलमेवाशेषधर्महेतुः ॥ 75 ॥ 1277

अभिरुचिरेव दाम्पत्यसम्बन्धहेतुः ॥ 76 ॥ 1278

स्त्रीत्वमेवोपभोगहेतुः ॥ 77 ॥ 1279

अनृतमेव व्यवहारजयहेतुः ॥ 78 ॥ 1280

उन्नताम्बुतैव पृथिवीहेतुः ॥ 79 ॥ 1281

ब्रह्मसूत्रमेव विप्रत्वहेतुः ॥ 80 ॥ 1282

रत्नधातुतैव श्लाघ्यताहेतुः ॥ 81 ॥ 1283

लिङ्गधारणमेवाश्रमहेतुः ॥ 82 ॥ 1284

अन्याय एव वृत्तिहेतुः ॥ 83 ॥ 1285

दौर्बल्यमेवावृत्तिहेतुः ॥ 84 ॥ 1286

अभयप्रगल्भोच्चारणमेव पाण्डित्यहेतुः ॥ 85 ॥ 1287

अनाढ्यतेव साधुत्वहेतुः ॥ 86 ॥ 1288

स्नानमेव प्रसाधनहेतुः ॥ 87 ॥ 1289

दानमेव धर्महेतुः ॥ 88 ॥ 1290

स्वीकरणमेव विवाहहेतुः ॥ 89 ॥ 1291

सद्वेषधार्येव पात्रम् ॥ 90 ॥ 1292

दूरायतनोदकमेव तीर्थहेतुः ॥ 91 ॥ 1293

कपटवेषधारणमेव महत्त्वहेतुः ॥ 92 ॥ 1294

इत्येवमनेकदोषोत्तरे तु भूमण्डले सर्ववर्णेष्वेव यो यो बलवान्स स भूपतिर्भविष्यति ॥ 93 ॥ 1295

एवं चातिलुब्धकराजासहाश्शैलानामन्तरद्रोणीः प्रजास्संश्रयिष्यन्ति ॥ 94 ॥ 1296

मधुशाकमूलफलपत्रपुष्याद्याहाराश्च भविष्यन्ति ॥ 95 ॥ 1297

तरुवल्कलपर्णचीरप्रावरणाश्चातिबहुप्रजाश्शीतवातातपवर्षसहाश्च भविष्यन्ति ॥ 96 ॥ 1298

न च करश्चित्त्रयोविंशतिवर्षाणि जीविष्यति अनवरतं चात्र कलियुगे क्षयमायात्यखिल एवेष जनः ॥ 97 ॥ 1299

श्रौते स्मार्त्ते च धर्मे विप्लवमत्यन्तमुपगते क्षीणप्राये च कलावशेषजगत्स्रष्टुश्चराचरगुरोरादिमध्यान्तरहितस्य ब्रह्ममयस्यात्मरूपिणो भगवतो वासुदेवस्यांशश्शम्बलग्रामप्रधानब्राह्मणस्य विष्णुयशसो गृहेऽष्टगुणर्द्धिसमन्वितः कल्किरूपी जगत्यत्रावतीर्य - सकलम्लेच्छदस्युदुष्टाचरणचेतसामशेषाणामपरिच्छिन्नशक्तिमाहात्म्यः क्षयं करिष्यति स्वधर्मेषु चाखिलमेव संस्थापयिष्यति ॥ 98 ॥ 1300

अनन्तरं चाशेषकलेरवसाने निशावसाने विबुद्धानामिव तेषामेव जनपदानाममलस्फटिकविशुद्धा मतयो भविष्यन्ति ॥ 99 ॥ 1301

तेषां च बीजभूतानामशेषमनुष्याणां परिणतानामपि तत्कालकृ
तापत्यप्रसूतिर्भविष्यति ॥ **100** ॥ 1302

तानि च तदपत्यानि कृतयुगानुसारीण्येव भविष्यन्ति ॥ **101** ॥ 1303

अत्रोच्यते

यदा चन्द्रश्च सूर्यश्च तथा तिष्यो बृहस्पतिः।
एकराशौ समेष्यन्ति तदा भवति वै कृतम् ॥ **102** ॥ 1304

अतीता वर्त्तमानाश्च तथैवानागताश्च ये।
एते वंशेषु भूपालाः कथिता मुनिसत्तम ॥ **103** ॥ 1305

यावत्परीक्षितो जन्म यावन्नन्दाभिषेचनम्।
एतद्वर्षसहस्रं तु ज्ञेयं पाञ्चशदुत्तरम् ॥ **104** ॥ 1306

सप्तर्षीणां तु यौ पूर्वौ दृश्येते ह्यादितौ दिवि।
तयोस्तु मध्ये नक्षत्रं दृश्येते यत्समं निशि ॥ **105** ॥ 1307

तेन सप्तर्षयो युक्तास्तिष्ठन्त्यब्दशतं नृणाम्।
ते तु पारीक्षिते काले मघास्वासन्द्विजोत्तम ॥ **106** ॥ 1308

तदा प्रवृत्तश्च कलिर्द्वादशाब्दशतात्मकः ॥ **107** ॥ 1309

यदैव भगवान्विष्णोरंशो यातो दिवं द्विज।
वसुदेवकुलोद्भूतस्तदैवात्रागतः कलिः ॥ **108** ॥ 1310

यावत्स पादपद्माभ्यां पस्पर्शामां वसुन्धराम्।
तावत्पृथ्वीपरिष्वङ्गे समर्थो नाभवत्कलिः ॥ **109** ॥ 1311

गते सनातनस्यांशे विष्णोस्तत्र भुवो दिवम्।
तत्याज सानुजो राज्यं धर्मपुत्रो युधिष्ठिरः ॥ **110** ॥ 1312

विपरीतानि दृष्ट्वा च निमित्तानि हिपाण्डवः।
याते कृष्णे चकाराथ सोऽभिषेकं परीक्षितः॥ 111 ॥ 1313

प्रयास्यन्ति यदा चैते पूर्वाषाढां महर्षयः।
तदा नन्दात्प्रभृत्येष गतिवृद्धिं गमिष्यति॥ 112 ॥ 1314

यस्मिन् कृष्णो दिवं यातस्तस्मिन्नेव तदाहनि।
प्रतिपन्नं कलियुगं तस्य संख्यां निबोध मे॥ 113 ॥ 1315

त्रीणि लक्षाणि वर्षाणां द्विज मानुष्यसंख्यया।
षष्टिश्चैव सहस्राणि भविष्यत्येष वै कलिः॥ 114 ॥ 1316

शतानि तानि दिव्यानां सप्त पञ्च च संख्यया।
निश्शेषेण गते तस्मिन् भविष्यति पुनः कृतम्॥ 115 ॥ 1317

ब्राह्मणाः क्षत्रिया वैश्याश्शूद्राश्च द्विजसत्तम।
युगे युगे महात्मानः समतीतास्सहस्रशः॥ 116 ॥ 1318

बहुत्वान्नामधेयानां परिसंख्या कुले कुले।
पौनरुक्त्याद्धि साम्याच्च न मया परिकीर्त्तिता॥ 117 ॥ 1319

देवापिः पौरवो राजा पुरुश्चेक्ष्वाकुवंशजः।
महायोगबलोपेतौ कलापग्रामसंश्रितौ॥ 118 ॥ 1320

कृते युगे त्विहागम्य क्षत्रप्रवर्त्तकौ हि तौ।
भविष्यतो मनोर्वंशबीजभूतौ व्यवस्थितौ॥ 119 ॥ 1321

एतेन क्रमयोगेन मनुपुत्रैर्वसुन्धरा।
कृतत्रेताद्वापराणि युगानि त्रीणि भुज्यते॥ 120 ॥ 1322

कलौ ते बीजभूता वै केचित्तिष्ठन्ति वै मुने।
यथैव देवापिपुरू साम्प्रतं समधिष्ठितौ॥ 121 ॥ 1323

एष तूद्देशतो वंशस्तवोक्तो भूभुजां मया।
निखिलो गदितुं शक्यो नैष वर्षशतैरपि॥ 122॥ 1324

एते चान्ये च भूपाला यैरत्र क्षितिमण्डले।
कृतं ममत्वं मोहान्थैर्नित्यं हेयकलेवरे॥ 123॥ 1325

कथं ममेयमचला मत्पुत्रस्य कथं मही।
मद्वंशस्येति चिन्तार्त्ता जग्मुरन्तमिमे नृपाः॥ 124॥ 1326

तेभ्यः पूर्वतराश्चान्ये तेभ्यस्तेभ्यस्तथा परे।
भविष्याश्चेव यास्यन्ति तेषामन्ये च येऽप्यनु॥ 125॥ 1327

विलोक्यात्मजयोद्योगं यात्राव्यग्रान्नराधिपान्।
पुष्पप्रहासैश्शरदि हसन्तीव वसुन्धरा॥ 126॥ 1328

मैत्रेय पृथिवीगीताञ्छ्लोकांश्चात्र निबोध मे।
यानाह धर्मध्वजिने जनकायासितो मुनिः॥ 127॥ 1329

पृथिव्युवाच

कथमेष नरेन्द्राणां मोहो बुद्धिमतामपि।
येन फेनसधर्माणोऽप्यतिविश्वस्तचेतसः॥ 128॥ 1330

पूर्वमात्मजयं कृत्वा जेतुमिच्छन्ति मन्त्रिणः।
ततो भृत्यांश्च पौरांश्च जिगीषन्ते तथा रिपून्॥ 129॥ 1331

क्रमेणानेन जेष्यामो वयं पृथ्वीं ससागराम्।
इत्यासक्तधियो मृत्युं न पश्यन्त्यविदूरगम्॥ 130॥ 1332

समुद्रावरणं याति भूमण्डलमथो वशम्।
कियदात्मजयस्यैतन्मुक्तिरात्मजये फलम्॥ 131॥ 1333

उत्सृज्य पूर्वजा याता यां नादाय गतः पिता।
तां मामतीवमूढत्वाज्जेतुमिच्छन्ति पार्थिवाः॥ 132॥ 1334

मत्कृते पितृपुत्राणां भ्रातृर्णां चापि विग्रहः।
जायतेऽत्यन्तमोहेन ममत्वादृतचेतसाम्॥ 133॥ 1335

पृथ्वी ममेयं सकला ममैषा
मदन्वयस्यापि च शाश्वतीयम्।
यो यो मृतो ह्यत्र बभूव राजा
कुबुद्धिरासीदिति तस्य तस्य॥ 134॥ 1336

दृष्ट्वा ममत्वादृतचित्तमेकं
विहाय मां मृत्युवशं व्रजन्तम्।
तस्यानु यस्तस्य कथं ममत्वं
हृद्यास्पदं मत्प्रभवं करोति॥ 135॥ 1337

पृथ्वी ममैषाशु परित्यजैनां
वदन्ति ये दूतमुखैस्स्वशत्रून्।
नराधिपास्तेषु ममातिहासः
पुनश्च मूढेषु दयाभ्युपैति॥ 136॥ 1338

श्रीपराशर उवाच

इत्येते धरणीगीताश्श्लोका मैत्रेय येश्श्रुताः।
ममत्वं विलयं याति तपत्यर्के यथा हिमम्॥ 137॥ 1339

इत्येष कथितः सम्यङ्मनोर्वंशो मया तव।
यत्र स्थितिप्रवृत्तस्य विष्णोरंशांशका नृपाः॥ 138॥ 1340

शृणोति य इमं भक्त्या मनोर्वंशमनुक्रमात्।
तस्य पापमशेषं वै प्रणश्यत्यमलात्मनः॥ 139॥ 1341

धनधान्यर्द्धिमतुलां प्राप्नोत्यव्याहतेन्द्रियः।
श्रुत्वैवमखिलं वंशं प्रशस्तं शशिसूर्ययोः॥ **140**॥ 1342

इक्ष्वाकुजह्नुमान्धातृसगरावि़क्षितान्नघून्।
ययातिनहुषाद्यांश्च ज्ञात्वा निष्ठामुपागतान्॥ **141**॥ 1343

महाबलान्महावीर्याननन्तधनसञ्चयान्।
कृतान्कालेन बलिना कथाशेषान्नराधिपान्॥ **142**॥ 1344

श्रुत्वा न पुत्रदारादौ गृहक्षेत्रादिके तथा।
द्रव्यादौ वा कृतप्रज्ञो ममत्वं कुरुते नरः॥ **143**॥ 1345

तप्तं तपो यैः पुरुषप्रवीरै -
रुद्धाहुभिर्वर्षगणाननेकान्।
इष्ट्वा सुयज्ञैर्बलिनोऽतिवीर्याः
कृता नु कालेन कथावशेषाः॥ **144**॥ 1346

पृथुस्समस्तान्विचचारलोका -
नव्याहतो यो विजितारिचक्रः।
स कालवाताभिहतः प्रणष्टः
क्षिप्तं यथा शाल्मलितूलमग्नौ॥ **145**॥ 1347

यः कार्तवीर्यो बुभुजे समस्तान् -
द्वीपान्समाक्रम्य हतारिचक्रः।
कथाप्रसङ्गेष्वभिधीयमान -
स्स एव सङ्कल्पविकल्पहेतुः॥ **146**॥ 1348

दशाननाविक्षितराघवाणा -
मैश्वर्यमुद्भासितदिङ्मुखानाम्।

भस्मापि शिष्टं न कथं क्षणेन
भ्रूभङ्गपातेन धिगन्तकस्य ॥ 147 ॥ 1349

कथाशरीरत्वमवाप यद्वै
मान्धातृनामा भुवि चक्रवर्ती।
श्रुत्वापि तत्को हि करोति साधु -
र्ममत्वमात्मन्यपि मन्दचेताः ॥ 148 ॥ 1350

भगीरथाद्यास्सगरः ककुत्स्थो
दशाननो राघवलक्ष्मणौ च।
युधिष्ठिराद्याश्च बभूवुरेते
सत्यं न मिथ्या क्वनु ते न विद्मः ॥ 149 ॥ 1351

ये साम्प्रतं ये च नृपा भविष्याः
प्रोक्ता मया विप्रवरोग्रवीर्याः।
एते तथान्ये च तथाभिधेयाः
सर्वे भविष्यन्ति यथैव पूर्वे ॥ 150 ॥ 1352

एतद्विदित्वा न नरेण कार्यं
ममत्वमात्मन्यपि पण्डितेन।
तिष्ठन्तु तावत्तनयात्मजाद्याः
क्षेत्रादयो ये च शरीरिणोऽन्ये ॥ 151 ॥ 1353

॥ इति श्रीविष्णुपुराणे चतुर्थेंऽशे चतुर्विंशोऽध्यायः ॥